



**Tracking:**

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 23/12/2014 | Typing Started on | H K Srinivasa Rao |
| 2 | 25/12/2014 | Typing Ended on | H K Srinivasa Rao |
| 3 | 25/12/2014 | Ist Proof Reading & Correction | H K Srinivasa Rao, MS Venugopal, and Ranganath Gangoor |

# ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Narayana Panditacharya. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 8095551774, 9901971176, , Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ 'ಸರ್ವಮೂಲ ಯಜ್ಞ '

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ.

ಗ್ರಂಥ ಋಣ- ಪಾವಂಜೆ ಗುರುರಾಜಾರಾವ್ ಅಂಡ್ ಸನ್ಸ - ಉಡಪಿ -ಇವರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಯೋಗದೀಪಿಕಾ -1956.

TABLEOFCONTENTS


॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥ ....2

ಕೃತಜ್ಞತೆಗಳು....2

॥श्रीयोगदीपिका॥10-623॥ ....4

प्रथमः पटल ॥1-73॥ ....4

द्वितीयः पटलः॥2-92॥ ....12

तृतीयः पटलः ॥3-88॥ ....22

चतुर्थ पटलः ॥4-41॥....32

पञ्चमः पटलः॥5-68॥ ....37

षष्ठः पटलः ॥6-65॥ ....45

सप्तमः पटलः ॥7-62॥....52

अष्टमः पटलः ॥8-81॥ ....60

नवमः पटलः ॥9-45॥....69

दशमः पटलः ॥10-88॥ ....74

# ॥श्रीयोगदीपिका॥10-623॥

## प्रथमः पटल ॥1-73॥

विष्णुं श्रीवल्लभं नत्वा मध्वं च प्राणनायकम्।
गुरूंस्त्रिविक्रमार्यंश्च क्रियते योगदीपिका॥1- 1॥

विहितैः कर्मभिः पुंसो निषिद्धानि नकुर्वतः।
परमाराधनं भक्त्या योगः कर्मसु कौशलम्॥1-2॥

मयि स्थितो मदङ्गेषु स्वतन्त्रो व्याप्तवान्हरिः।
स सर्वस्याऽत्मतन्त्रो मां स्वेच्छयाऽऽवर्तयत्यजः॥1-3॥

स्वात्मनस्तस्य पूजाः स्युर्मनोवाक्कायवृत्तयः।
ममैता इति कर्तारमुद्देश्यं च हरिं स्मरेत्॥1-4॥

पूर्णप्रसादकृद्विष्णोर्योगोऽयं बन्धमोक्षदः।
किमु साङ्ख्यमयश्चेत्स सुप्रयुक्तोऽधिकारिणा॥1-5॥

योग्यं भागवतं  जातं जातकर्मादिकर्मभिः।
हरिपूजात्मके स्मार्ते स्वपुत्रं योजयेत्पिता॥1-6॥

तं बाल्य एव पित्राद्याः शिक्षयेयुर्हरिप्रियाः।
यथाशक्ति यथायोगं भक्तिधर्मव्रतादिकम्॥1-7॥

द्विजो गुर्वर्चकः शुद्धचरणो नित्यकर्मकृत्।
सायंप्रातः समिद्धोमी भैक्षान्नादः श्रुतीः पठेत्॥1-8॥

| |
|---|
| श्रीमद्भारततात्पर्यनिर्णयाद्यं समभ्यसेत्।<br>अनध्याये न तत्कुर्याद्युत्पन्नो न्यायशिक्षणम्॥ 1-9॥ |
| उज्झेन्निषिद्धकर्माणि विहितानि समाचरेत्।<br>भजेन्नृसिंहकृष्णाद्यं ज्ञानविघ्नप्रशान्तये॥ 1-10॥ |
| अनादिभक्तिः परमे द्विजन्मभाक् अपातकः शब्दनयानुशिक्षणः।<br>अधीतवेदः सुतपा व्रती गुरोर्लभेत विद्यां परमां प्रसन्नतः॥ 1-11॥ |
| सूत्रभाष्यादिकं श्रुत्वा मन्वीत सखिभिः सह।<br>सटीकमप्यनध्याये गीताप्रकरणादिकम्॥ 1-12॥ |
| संस्कारवन्तमाचार्यो दीक्षयेत्तं हरिप्रियम्।<br>दीक्षयिष्यन्नमुं स्नातमाचान्तं प्रणतं परः॥ 1-13॥ |
| पादोदकं "तदस्ये"ति प्राशयेत्परमेशितुः।<br>दीक्षितः स गुरूद्दिष्टैर्व्रतैरुपवसेद्दिनम्॥ 1-14॥ |
| त्रीणि वा पञ्चगव्याशी सप्त पञ्च दशापि वा।<br>शुचौ समे दृढे देशे गुरुश्चक्राब्जमालिखेत्॥ 1-15॥ |
| स सन्निधानवृद्ध्यर्थं कलशस्नापनादिकम्।<br>कुर्याद्धरेस्तथोत्पातेष्वपि दृष्टेषु सर्वथा॥ 1-16॥ |
| असव्ये पुरतस्तस्य शुचौ देशेऽम्बुजं लिखेत्।<br>तन्मध्ये पूरयेच्छालींस्तेषु दर्भान्प्रसारयेत्॥ 1-17॥ |

| |
|---|
| कूर्चं तत्राक्षतैर्युक्तं "विष्णुर्मे प्रीयता" मिति।<br>गोमयाद्भिर्बहिर्लिप्त्वाऽलङ्कुर्यात्कुसुमाक्षतैः ॥1-18॥ |
| घटं प्रक्षाल्य सूत्रेण त्रिवृता वेष्टयेदथ।<br>धूपायेद्बहिरन्तश्च पद्मेऽन्यत्सादयेत्पुनः ॥1-19॥ |
| दर्भैर्द्वादशभिः कूर्चं नवभिस्त्रिभिरेव वा।<br>हरेर्मूर्त्यात्मकं स्मृत्वा बध्वा तस्योपरि क्षिपेत्॥1-20॥ |
| अथ मन्त्री कृतस्नानः स्वाचान्तः शुद्धदेहवान्।<br>कृत्वाऽऽत्मदीपविघ्नार्चां कलशार्चनमाचरेत्॥1-21॥ |
| पूर्वं पीठार्चनं कृत्वा घटमुत्तानयेद्बुधः।<br>चन्दनाक्षतपुष्पाणि तस्मिन्स्वर्णफले क्षिपेत्॥1-22॥ |
| अहन्युपाहृतास्वप्सु वस्त्रपूतासु मूर्तिपैः।<br>हरिमावाहये "द्यासा" मृचा मूलेन वारुणम्॥1-23॥ |
| कृत्वा घटास्ये कूर्चाग्रं तत्राऽत्मानं प्रसेचयेत्।<br>जपंस्तु मूलमन्त्रादीन्लिपीश्च प्रातिलोम्यतः ॥1-24॥ |
| तारानष्टावष्टगन्धैर्जलमूलेन कम्पयेत्।<br>उशीरं कुङ्कुमं मांसी कुष्ठं मलयजोऽगरुः ॥1-25॥ |
| हीरबेरं मुरं चेति गन्धाष्टकमुदीरितम्।<br>असौलभ्ये च गन्धानां चन्दनं च प्रशस्यते॥1-26॥ |

| |
|---|
| कृत्वोदग्रं तत्र कूर्चं मूलेनाऽवाहयेद्धरिम्।<br>सत्कराञ्जलिना धूपं गन्धपुष्पाक्षतांस्तथा॥ 1-27 ॥ |
| शक्तिं साङ्कर्षणीं तस्मिन्कृत्वा मूलं जपेत्त्रिशः।<br>तारान्ते "भगव" न्नुक्त्वा तथा "ऽऽगच्छे"त्यनन्तरम्॥ 1-28 ॥ |
| ''आवाहयामी" ति चोक्त्वा मूलं च त्रिर्जपेत्पुनः।<br>चतुर्दश च बीजानि पुनर्मूलमुदाहरेत्॥ 1-29 ॥ |
| एवमादित्यगाद्विष्णोर्दीपाद्दीपान्तरं यथा।<br>व्यूढमञ्जलिना रूपमानीयावाहयेज्जले॥ 1-30 ॥ |
| मूलेन मुद्रयेत्पीठमङ्गुष्ठाभ्यां कनिष्ठयोः।<br>मूले सम्मुद्य मूलं च स्वागतं चाप्युदीरयेत्॥ 1-31 ॥ |
| अथानामिकयोः कृत्वा "स्थिरो भव" समीरयेत्।<br>मुष्टीकृत्य ततोऽङ्गुष्ठे "सन्निरुद्धो भवे"ति च॥ 1-32 ॥ |
| मूलेन बिन्दुमुद्राभ्यां ब्रूयात् "सन्निहितो भव"।<br>मुष्टीकृत्य ततोऽङ्गुष्ठौ संहतौ तु परस्परम्॥ 1-33 ॥ |
| सकृदावृत्य मूलेन ब्रूयात् "संस्थापितो भव"।<br>एवं सम्भाव्य मुद्राभिर्व्यापकन्यासमाचरेत्॥ 1-34 ॥ |
| त्रिशस्तालेन मूलादीन् मूलाङ्गानि न्यसेत्ततः।<br>एवमावह्य लिप्यङ्गन्यासौ कृत्वा लिपीर्न्यसेत्॥ 1-35 ॥ |

| |
|---|
| सतारं वाऽपि साजाद्यं प्रतिलोमं कलाशतम्।<br>तत्वाङ्गानि तु तत्वानि स्थित्युत्पत्तिलयात्मना॥ 1-36॥ |
| मूलमन्त्राक्षराङ्गानि न्यसेद्दृष्यादिकं हरौ।<br>चक्रशङ्खगदापद्ममालाश्रीवत्सकौस्तुभान्॥ 1-37॥ |
| किरीटं कुण्डले योनिं मृद्रयेच्छ्रीभुवोश्च तान्।<br>अथ चन्द्रभुवोर्बीजं जप्त्वा बद्धाञ्जलिर्नतः॥ 1-38॥ |
| क्षमापयेत् 'क्षमस्वे"ति "प्रसीदे"ति प्रसादयेत्।<br>पनसाश्वत्थचूतानां पल्लवान्कलशे क्षिपेत्॥ 1-39॥ |
| चषके हेम्नि ताम्रे वा तण्डुलान्पल्लवोपरि।<br>निक्षिप्य सफलं तस्मिन्घटं वस्त्रेण गूहयेत्॥ 1-40॥ |
| सहस्रं परमं मूलं जपेद् ध्यात्वा श्रियः पतिम्।<br>स्नपनीयानुरूपेण पावयन्तं स्वतेजसा॥ 1-41॥ |
| अर्घ्यादिपञ्चकं कृत्वा पुनः षड्भिर्जलादिभिः।<br>सम्पूर्णकलशं प्रीत्या पूजया तूपसंहरेत्॥ 1-42॥ |
| कलशाङ्गतया हुत्वा सम्पातं तत्र पूजयेत्।<br>ततोऽङ्गं तत्र विन्यस्य चक्रादीनपि मुद्रयेत्॥ 1-43॥ |
| ततस्त्रिरस्त्रमन्त्रेण अरिमुद्रां प्रदर्शयेत्।<br>अथ चक्राम्बुजे विष्णुं तच्छक्त्युपचितैर्धनैः॥ 1-44॥ |

| |
|---|
| पूजयेत्परमं तत्र कुर्युर्होमांश्च मूर्तिपाः।<br>ततो दीक्षितमात्मानं प्रोक्षेत्तीर्थाम्बुना गुरुः ॥1-45॥ |
| तालत्रयादिकं कुर्यात्तस्य मूर्धनि संस्पृशेत्।<br>तदन्तः पवनं स्मृत्वा तदन्तः परमं स्मरेत्॥1-46॥ |
| क्षेत्रज्ञं बोधयेत्तारप्राणायामैस्त्रिभिः स्वयम्।<br>प्राणायामैः खगैः पञ्चदीर्घाजान्तैर्विलापेयत्॥1-47॥ |
| क्ष्माद्यैस्तद्देहभूतानि स्मृत्वा ब्रह्मशरीरिणम्।<br>तद्गतं पापकर्माणं परीतं पापिनां शतैः॥1-48॥ |
| नानाकर्मेन्द्रियाधारैर्वाय्वायामेन शोषयेत्।<br>अग्निनाऽऽयम्य वायूंस्तान्निर्दहेत्पुंऋगात्मना॥1-49॥ |
| वारुणेन शिरश्चन्द्रात्पावयेद्गलितामृतैः।<br>अमृतात्मनि मज्जन्तं मज्जायां परमेश्वरः॥1-50॥ |
| सद्गुणैर्ज्ञानभक्त्याद्यैर्विशिष्योत्पादयेदिति।<br>स्मरंस्तारं जपेत्पञ्चविंशद्वारं रमेशितुः॥1-51॥ |
| तत्वरूपाणि संस्मृत्य सृष्टिद्वारेण शक्तिमान्।<br>अथ ब्राह्मशरीरस्थं दीपोज्वलितचित्प्रभम्॥1-52॥ |
| पीयूषबुद्बुदाकारं तत्वदेवोपबृंहितम्।<br>खादिद्वारेण सृजति परमात्मेति चिन्तयेत्॥1-53॥ |

| |
|---|
| प्राणायामान्पञ्च कुर्यादुदितान्प्रातिलोम्यतः।<br>अथ सर्वाङ्गसम्पन्नममृतस्राविणं हरेः॥1-54॥ |
| भक्तिज्ञानादिपूर्णं तं सत्तमं संस्मरेद्गुरुम्।<br>न्यसेल्लिप्यादिकं सर्वं हरिं ध्यात्वा समाहितः॥1-55॥ |
| प्रणतः समनुज्ञातो हरिणा गुरुणा च सः।<br>कूर्चपाणिः शनैर्गच्छेद्दैशान्यां स्नानमण्टपम्॥1-56॥ |
| दृष्ट्वाऽऽदित्यं हरिं स्मृत्वोपविशेत्स्वस्तिकान्तरे।<br>कुशव्रीह्यक्षतैः सिद्ध आसने तूर्ध्वजानुकः॥1-57॥ |
| आचार्यो जलगन्धाद्यैः कलशं पूजयेत्ततः।<br>प्रस्थानार्घ्यं प्रदायाङ्गं न्यस्यैनं प्रोद्धरेच्छनैः॥1-58॥ |
| नयेत्प्रदक्षिणावर्तमातपत्रोपशोभितम्।<br>आर्यो वाद्यविशेषेण कलशं तमुपानयेत्॥1-59॥ |
| मौलावक्षतमादाय धूपयेत्पल्लविप्लुषः।<br>विन्यस्य कूर्चं स्नपयेत्प्राञ्जलिः कलशोदकैः॥1-60॥ |
| मूलमन्त्रं जपेद्धीमाननुलोमं तथा लिपीः।<br>पुंसूक्तं च स्मरेदेतद्रूपं तस्मिन्समाहितः॥1-61॥ |
| पुनरङ्गानि विन्यस्य हृदयं तत्र संस्पृशेत्।<br>परिधाय नवं वासो धौतं वाऽऽचान्त आनतः॥1-62॥ |

| |
|---|
| धृतोर्ध्वपुण्ड्रो मौनी स मण्डपे प्रणमेद्धरिम्।<br>आचार्यो दक्षिणे पार्श्वे नतं तमुपवेशयेत्॥1-63॥ |
| सपर्याहोमसम्पातेनाज्येनैनं समञ्जयेत्।<br>लिप्यादिकं पुनर्न्यस्य तं स्पृष्ट्वा प्रजपेन्मनुम्॥1-64॥ |
| हृदये तस्य योगेन श्रीपतिं प्रतिदीपयेत्।<br>हरिप्रियैरनुज्ञातमपोह्य जनतां ततः॥1-65॥ |
| वेदाञ्जलिस्फुरत्कूर्चमूर्ध्वजानुमुपासितम्।<br>श्रावयेत्परमं तत्वं मूलमन्त्रानपीतरान्॥1-66॥ |
| त्रिचतुःपञ्चवारं वा यथायोग्यं यथाविधि।<br>गुरुर्वेदमयं हस्तं तस्य मूर्धनि विन्यसेत्॥1-67॥ |
| भक्तिज्ञानादिकं  दद्याद्वारं सम्प्रीतये हरेः।<br>आचार्यमर्चयेत्सोऽथ दक्षिणाभिः समूर्तिपः॥1-68॥ |
| विष्णोर्निवेदितान्नेन भोजयेद्वैष्णवं जनम्।<br>स पूजामुपसंहृत्य प्रार्थयेत्परमेश्वरम्॥1-69॥ |
| कर्मसिद्धिं हि शिष्यस्य स हि सर्वफलप्रदः।<br>शनकैः श्रृणुयात्तन्त्रसारसङ्ग्रहमादरात्॥1-70॥ |
| अनुतिष्ठेच्च तन्त्रोक्तं शास्त्रं विज्ञानदीपनम्।<br>तत्रोदिताञ्जपेन्मन्त्रांस्तद्देवध्यानमाचरेत्॥1-71॥ |

मन्त्रसिद्धस्य तस्याऽऽशु परमात्मा प्रसीदति।
ईदृशः पुरुषो योगमर्हत्येव विशेषतः॥1-72॥

तत्वदैवान्यनुग्राह्य स सुखी योगमाचरेत्॥1-73॥

इति योगदीपिकायां प्रथमः पटलः॥73॥

## द्वितीयः पटलः॥2-92॥

आचरिष्यन्पुमान्योगं स्वस्य देहेन्द्रियादिषु।
भावयेत्सच्चिदानन्दं हरेर्देहेन्द्रियादिकम्॥2-1॥

अथ भावं समस्तं वा कुर्वाणो योगयेद्धरौ।
मयि स्थितः करोतीशः कुर्यां तत्प्रीतये त्विति॥2-2॥

परिव्रजेद्वा सोऽध्यायी वर्ण्यैव परमाद्गुरोः।
अतोऽन्यथा गुरुः प्राज्ञस्तं समावर्तयीत वा॥2-3॥

शुश्रूषादक्षिणातृप्ताद्गुरोर्लब्धवरः सुधीः।
साङ्ख्ययोगसुधासिन्धुः संश्रयेदाश्रमान्तरम्॥2-4॥

स्वाश्रमोचितया वृत्त्या भगवन्तं समर्चयेत्।
अन्यत्परित्यजेन्नित्यं किं तेनानर्थकारिणा ॥2-5॥

अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रही।
शुचिस्तपस्वी सन्तुष्टः स्वाध्यायाभ्यर्चनव्रती ॥2-6॥

| |
|---|
| सच्छास्त्रं श्रुणुयात्पृष्ट्वा बहुवीर्यः पुनः पुनः।<br>मन्वीत सखिभिर्यावत्सर्वथा शास्त्रनिर्णयम्॥2-7॥ |
| पद्माद्यं पवनायामैरुपसंहृतकिल्बिषः।<br>हरिं ध्यायन्परं शास्त्रमवमर्शेत्पुनःपुनः॥2-8॥ |
| प्रब्रूयादपि शिष्येभ्य इत्युपास्तिसमग्रता।<br>सत्सूत्तमेषु भक्तः स्यात्स्निग्धः सत्स्वधमेषु च॥2-9॥ |
| हरिभक्तेषु नो कुर्यादसूयाकोपमत्सरान्।<br>श्रीमदानन्दतीर्थीयपादरेणुनिषेविषु॥2-10॥ |
| कुर्याद्भक्तिं मनोरम्याममी हि भवभेषजम्।<br>किं पुनस्तत्वदेवेषु श्रीमध्वानादिसेविषु॥2-11॥ |
| वाण्यां च वेदविद्यायां श्रीमध्वे का कथा पुनः।<br>"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ"॥2-12॥ |
| तस्य पूर्णसुखान्याह श्रुतिरेषा सनातनी।<br>मुहूर्ते ब्राह्म उत्थाय सर्वात्मानं हरिं हृदि॥2-13॥ |
| स्मृत्वाऽतो निर्गतोऽनेन जागर्मीत्यनुचिन्तयेत्।<br>स्वामिन्दासोऽस्मि ते नित्यं प्रियं ते किं करोम्यहम्॥2-14॥ |
| अप्रिये भवतो नाथ मागान्मे मन आदिकम्।<br>इत्यभ्यर्थ्य रमानाथं स कुर्यात्सततं क्रियाः॥2-15॥ |

| |
|---|
| शरीरं शोधयेत्पूर्वं देवसन्निधिसिद्धये।<br>गत्वा तु नैरृतीमाशां गवादेरपुरोभुवि॥2-16॥ |
| विन्यस्य तृणमेकान्ते तत्र मूत्रं प्रवर्तयेत्।<br>उदङ्मुखोंऽशुकशिरा रात्रौ चेद्दक्षिणामुखः॥2-17॥ |
| शुष्कया दृढया यष्ट्या वामदोष्णा च रेचयेत्।<br>लिङ्गाग्रं वामहस्तेन सङ्गृह्यंस्तत उत्थितः॥2-18॥ |
| अविलोक्यसमायातो मृत्स्नया शौचमाचरेत्।<br>गन्धलेपापकर्षार्थं सकृल्लिङ्गे त्रिशः करे॥2-19॥ |
| मृद्ग्राह्या सप्तशोऽपाने पाण्योर्लिङ्गे त्रिशस्त्रिशः।<br>कुर्यादुक्तं ततः शौचं सकृल्लिङ्गे मृदा त्रिशः॥2-20॥ |
| सव्ये च पञ्चशोऽपाने दशकृत्वश्च सव्यके।<br>सप्तकृत्वो द्वयोः पाण्योर्लिङ्गे व्यक्तं पुनस्त्रिशः॥2-21॥ |
| प्रक्षाल्य सक्थिदेशं च परिदध्यादथांशुकम्।<br>प्रक्षाल्य त्रिर्मृदा पादौ गण्डूषान्द्वादशाऽचरेत्॥2-22॥ |
| आचान्तः शौचमृच्छेषं त्यक्त्वा तत्क्षालयेत्स्थलम्।<br>प्रक्षाल्य जानुपद्धस्तान्मुखं च सलिलैः शुभैः॥2-23॥ |
| आचम्याघ्र्यादिभिर्भूयोऽप्याचम्याऽचान्त उच्यते।<br>जलाद्युगविदूरे तु प्राङ्मुखो मुनिरासितः॥2-24॥ |

| |
|---|
| दन्तान्विशोध्य तत्स्थानं जलमानीय सिञ्चयेत्।<br>कण्टकाः क्षीरिणः काष्ठाः प्रादेशोत्तरमानकाः ॥ 2-25 ॥ |
| प्रशस्तास्सिन्धुवाराद्या निषिद्धा दन्तधावने।<br>अभावे दन्तकाष्ठानां निषिद्धे वा तथाऽहनि ॥ 2-26 ॥ |
| अपां द्वादशगण्डूषैः पर्णैर्वा दन्तशोधनम्।<br>दन्तान्विशोध्य गण्डूषैः शोधयित्वा ततो मुखम् ॥ 2-27 ॥ |
| आचान्तो मृत्तिकां तीर्थात्पाणिभ्यामपवाहयेत्।<br>"पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिषु" ॥ 2-28 ॥ |
| इति स्मृतिवचोमानात्स्नानपर्याप्तिसिद्धये।<br>"उद्धृते" ति मृदा लिम्पेद्देहे कक्षालिकेष्वथ ॥ 2-29 ॥ |
| असञ्ज्ञानूरुपृष्ठेषु नमेत्कृष्णरमागुरून्।<br>तीर्थान्यावाहये "च्चेम" मृचाऽऽनाभि जले स्थितः ॥ 2-30 ॥ |
| अपवाहयेच्च सलिलं "यदपा" मिति मन्त्रतः।<br>तत्र मज्जेद्धरिं ध्यात्वा द्विषडष्टषडक्षरान् ॥ 2-31 ॥ |
| मन्त्रांश्च मनसा जप्त्वा तत्पादस्पर्शनं स्मरेत्।<br>"आगच्छन्त्वि"ति मन्त्रेण जलं त्रिरपसव्यतः ॥ 2-32 ॥ |
| पितृभ्यः प्रक्षिपे "द्विष्णुः प्रीयता"मिति चिन्तयेत्।<br>उन्मृज्याङ्गानि चाऽचान्त आप्यमन्त्रैः समुक्षतात् ॥ 2-33 ॥ |

| |
|---|
| पूर्ववन्मृदमालिप्य तथा मज्जे "द्रुतं" जपेत्।<br>पुंसूक्तेनाभिषिच्य स्वमाचामेज्जलतीरयोः ॥ 2-34 ॥ |
| स आचामेऽन्तरङ्गानां स्नानरूपो निगद्यते।<br>ऋग्यजुःसामवेदैस्तु चतुर्थ्यन्तैः स्वरद्वयैः ॥ 2-35 ॥ |
| अश्नीत त्रिर्मुखं तिर्यङ्मार्जयेद्भिः स्पृशन्नपः।<br>"अथर्ववेदाय नम" इति प्राच्यो मनुस्तयोः ॥ 2-36 ॥ |
| "इतिहासपुराणाभ्यां नम" इत्यपरोमतः।<br>"अग्नये नम" इत्युक्त्वा मार्जयेद्धध आननम् ॥ 2-37 ॥ |
| "विष्णवे नम"इत्युक्त्वा सिञ्चेत्प्रपदयोर्जलम्।<br>साङ्गुष्ठयाऽनामिकया स्पृशेच्चक्षुर्द्वयं क्रमात् ॥ 2-38 ॥ |
| स वामांसे तु तर्जन्या श्रोत्रेऽङ्गुल्याकनिष्ठया।<br>समस्ताभिर्वामपाणिं सीमां मध्यमया स्पृशेत् ॥ 2-39 ॥ |
| हृदयं च समस्ताभिः सूर्यो वायुर्दिशस्तथा।<br>वसिष्ठः श्रीः परात्मा च सोद्देशा हृद्वसानकाः ॥ 2-40 ॥ |
| तत्र मन्त्राः प्रशस्यन्ते मन्त्राचामोऽयमीरितः।<br>विष्णुपादोदकस्नायी शुचिनाऽऽवेष्ट्य वाससा ॥ 2-41 ॥ |
| विमुच्याऽऽर्द्रं क्षालितायां कट्यामुद्ग्रथयेच्च तत्।<br>आचम्य पुनराचम्य गोप्या पुण्ड्राणि धारयेत् ॥ 2-42 ॥ |

| |
|---|
| सलिलैर्वाऽप्यसौ कुर्याल्ललाटोदरहृद्गले।<br>दक्षिणे पार्श्वदोर्मूलकण्ठपार्श्वेषु सव्यतः॥2-43॥ |
| पृष्ठमूले च ककुदि मूर्धन्याद्यन्तयोरपि।<br>तन्मनुर्द्वादशार्णः स्यादपरे केशवादयः ॥2-44॥ |
| सुदर्शनं च शङ्खं च मुद्रयेद्बाहुमूलयोः।<br>स शुचिः स्नात आचान्तो बहिरन्तः स्मरन्हरिम्॥2-45॥ |
| त्रिरपामञ्जलिं दत्वा सावित्रीं शक्तितो जपेत्।<br>वन्देताथ परात्मादीन्दोः संध्यादिपुरःसरम्॥2-46॥ |
| प्राणायामत्रयं कृत्वा वर्णन्यासं समाचरेत्।<br>"दोःपत्सन्धिषु साग्रेषु नाभिहृन्मुखकेष्वि"ति॥2-47॥ |
| व्यापकं न्यस्य तारादीन्यङ्गान्यृष्यादिकान्न्यसेत्।<br>सूर्यमण्डलगं विष्णुं ध्यायन् मध्वोक्तवर्त्मना॥2-48॥ |
| गायत्रीं प्रजपेन्मौनी प्रीयतां भगवानिति।<br>समे रहः शुचौ देशे पद्माद्यन्यतमासनः॥2-49॥ |
| सिञ्चयेद्वा पुरो ब्रह्म प्राङ्मुखः प्राञ्जलिः स्मरन्।<br>मध्ये सव्येतरे सव्ये गुरून्सर्वांश्च देवताः॥2-50॥ |
| नमेत्सर्वगुरून्मूले सतारोद्देशहृत्स्वकैः।<br>बुधस्तैः समनुज्ञातः करन्यासं समाचरेत्॥2-51॥ |

| |
|---|
| बाह्वोरन्तर्बहिः पार्श्वे कनिष्ठाद्यङ्गुलीषु च।<br>न्यसेत्ताराग्निबीजेन करन्यासोऽयमीरितः॥2-52॥ |
| नृसिंहाग्निर्ज्वलत्पाणिस्तेन तालत्रयं क्रियात्।<br>तन्निर्गतैर्विष्फुलिङ्गप्रकरैर्विघ्नतो दहेत्॥2-53॥ |
| स्फुटास्त्रमुद्रया वायुप्रेरितज्वलदर्चिषा।<br>द्रावयेद्दह्यमानांस्तान्क्रमाद्बध्नन् दिशो दश॥2-54॥ |
| प्राकारं परितोऽग्नेः स्वं कल्पयेदेकमुद्रया।<br>ऋजुकायोपविष्टस्य सुषुम्नाऽस्य प्रकाशते॥2-55॥ |
| मूर्धन्योपरिगादित्यसुषुम्नाघृणिदीपिका।<br>तन्मध्ये हृदये पद्मे मूलसृष्ट्यादिकारणम्॥2-56॥ |
| स्मरेन्नारायणं तस्य प्रतिबिम्बं पुरः स्वकम्।<br>"बिम्बोऽसि प्रतिबिम्बोऽस्मि तव यद्यपि चान्तरम्॥2-57॥ |
| स्वामिन्निर्दोष मद्दोषं विवे(रे) चय नमोऽस्तु ते"।<br>इत्यर्थितः स्वदासेन जघ्राऽसौ दर्शनत्विषा॥2-58॥ |
| विवे(रे) चयति पाप्मानं तादृग्देहेन्द्रियात्ततः।<br>प्राणायामं ततः कुर्याद्वायुबीजेन सोऽचलः॥2-59॥ |
| स त्र्यंशो रेचकश्चैव पूरकः कुम्भकस्त्विति।<br>असव्यसव्यनास्यौ तावाद्यावन्त्यो मरुद्धृतिः॥2-60॥ |

| |
|---|
| द्विगुणो रेचकात्पूरः कुम्भकस्त्रिगुणोऽथवा।<br>पूरकास्फालनोद्बुद्धमूलशक्त्या मुखोद्गलन्॥2-61॥ |
| आस्फालयति पाप्मानं वायुः कौम्भकसंयुतः।<br>स संशुध्यति तद्योगात्तत्र तत्र परिभ्रमन्॥2-62॥ |
| जीवः सर्वशरीरान्तं स्थूलसूक्ष्मशरीरवान्।<br>वह्निना पवनायामैर्वाय्वास्फालप्रसारिभिः॥2-63॥ |
| हृद्ब्जस्थनृसिंहाग्निज्वालैःपाप्मा स दह्यते।<br>वायुना सानुबन्धेऽस्मिन्भस्मरूपेण रेचिते॥2-64॥ |
| स्वर्णवन्निर्मलौ स्यातामदूनौ देहदेहिनौ।<br>स्विन्नादिन्दोः कपद्मस्थात्सुधा वातायते हृदि॥2-65॥ |
| संस्रुताऽऽप्लावयत्येनमन्तः सर्वशरीरगम्।<br>अङ्गन्यासोङ्गमन्त्रेभ्यः परमङ्गानि निर्दिशेत्॥2-66॥ |
| हृदयं शिरोऽपितु शिखाकवचास्त्राणि तानि च।<br>सोद्देशानि नमःस्वाहावषट् हुंफट् पराणि च॥2-67॥ |
| षडङ्गानां तु नेत्राभ्यां वौषडित्यस्त्रतः पुरः।<br>न्यासस्थानानि विज्ञेयान्यङ्गानां हृदयादिभिः॥2-68॥ |
| कवचं व्यापकं देहे त्वस्त्रं स्यात्तालपूर्वकम्।<br>ऋष्यादींश्च ततो न्यस्येन्मूर्ध्नि वाचि तथा हृदि॥2-69॥ |

| |
|---|
| असावृषिरिदं छन्दस्तथाऽसौ देवतेति च।<br>पञ्चव्याहृतिसत्यानि लिप्यङ्गानृषिपूर्वकान्॥ 2-70 ॥ |
| अन्तर्याम्यस्य गायत्री परमात्मेति च न्यसेत्।<br>सताराश्च लिपीर्न्यस्येद्लिके परितो मुखम्॥ 2-71 ॥ |
| नेत्रश्रुन्नासिकागण्डे दन्तच्छदशिरोमुखे।<br>दोः पत्सन्धिषु साग्रेषु पार्श्वपृङ्गुह्यनाभिषु॥ 2-72 ॥ |
| हृद्यत्र धातवः प्राणमहाप्राणनृसिंहकाः।<br>अजादिरूपिणं विष्णुं ध्यात्वा न्यस्येल्लिपीरिति॥ 2-73 ॥ |
| प्राणायामत्रयं कुर्यान्मूलमष्टोत्तरं जपेत्।<br>क्रुद्धमहावीरद्युसहस्रसहितोल्ककैः॥ 2-74 ॥ |
| द्विरान्तैः पूर्वमृष्याद्यैस्तत्वाद्यङ्गादिकान्न्यसेत्।<br>सव्यादिपाददोरण्वाद्यङ्गुलीषूरूबाहुषु॥ 2-75 ॥ |
| न्यसेधृदि च तत्वान्यत्रैकादशपराण्यपि।<br>हृतिरेषामनुष्ठानं प्रातिलोम्येन सर्जनम्॥ 2-76 ॥ |
| परावरप्रातिलोम्यानुलोम्येन स्थितौ न्यसेत्।<br>मूलेन व्यापकन्यास एषां स्यादन्तरेऽन्तरे॥ 2-77 ॥ |
| पज्जानुनाभिहृदयमुखनासाक्षिकेषु च।<br>मूलमन्त्राक्षरन्यासः व्यापकान्तरितः क्रमात्॥ 2-78 ॥ |

| |
|---|
| स्थानानां प्रातिलोम्येन न्यासः सृष्टेस्तथा स्थितेः।<br>हृन्मर्यादः पदारब्धस्तदूर्ध्वादिविधिक्रमः॥2-79॥ |
| तत्वमन्त्रोक्तमङ्गाद्यं मूलमन्त्रस्य च न्यसेत्।<br>हृदि नारायणं ध्यायन्देहे चक्रादि मुद्रयेत्॥2-80॥ |
| विशेषमन्त्रानादेशे मूलमन्त्रः प्रशस्यते।<br>मन्त्राणां तारमूलत्वमनिर्देशेऽपि निश्चितम्॥2-81॥ |
| दीर्घमञ्जलिमाबध्य मूलमन्त्रं समाहितः।<br>अष्टोर्ध्वत्रिशतीवारं जपेन्नारायणं स्मरन्॥2-82॥ |
| षट्शतीवारमपि वा "स्वाम्ययं पीयता" मिति।<br>स्वदेहे परमं ध्यात्वा चक्रमुद्रादि कल्पयेत्॥2-83॥ |
| न्यस्याङ्गाद्यमनुप्राणायाम्युपासां समापयेत्।<br>सर्वे न्यासादयो मन्त्रा गुरुभिर्दर्शिताः स्फुटम्॥2-84॥ |
| पुमानावर्तयेदेवं मन्त्रीति प्रणिगद्यते।<br>देवं देवान्गुरून्नत्वा सुप्रसन्नः सुभक्तिमान्॥2-85॥ |
| वेदान्तं श्रृणुयात्साकं वयस्यैर्मननं क्रियात्।<br>प्रतिभातश्रुतिशिरा भाष्याणि श्रुणुयाद्व्रती॥2-86॥ |
| ब्रूयाद्भागवतं विद्वाननध्याये सनिर्णयम्।<br>स एवं श्रवणं कुर्वन्मननं च यथामति॥2-87॥ |

| |
|---|
| कुर्यादाचार्यशुश्रूषां तदुक्तनियमे स्थितः।<br>व्यक्तशास्त्रस्तु शिष्येभ्यः प्रब्रयात्प्रीतये हरेः॥2-88॥ |
| प्राज्ञान्भागवतश्रेष्ठान्परिपृच्छेत्पुनः पुनः।<br>आचाराचार्यवेदादेर्मिथ्यात्वप्रतिपादकम्॥2-89॥ |
| पाषण्डं खण्डयेद्युक्त्या मायावादमतन्द्रितः।<br>परनिन्दा न कर्तव्या स्यात्समः सर्ववस्तुषु॥2-90॥ |
| इति मत्वा पुरीषादि को वा स्वीकुरुते बुधः।<br>सौकर्ये स्नात आचान्तः कुर्यान्माध्याह्निक क्रियाम्॥2-91॥ |
| तर्पणं चेशदेवादेर्गृही स्वाध्यायतर्पणम्॥2-92॥ |

इति योगदीपिकायां द्वितीयः पटलः॥2-92॥

## तृतीयः पटलः ॥3-88॥

| |
|---|
| अथाचान्तः पुरो विष्णोरुपविष्टः स मान्त्रिकः।<br>अब्गन्धकुसुमैरन्यैः कुर्यादात्मार्चनं हृदि॥3-1॥ |
| ब्रह्मरन्ध्रे सुषुम्नायां सुषुम्नाकिरणद्युति।<br>अर्चयेत्पीठदेवादीन् मध्ये मूलं समर्चयेत्॥3-2॥ |
| दक्षिणे गुरवः पार्श्वे सम्पूज्याः सर्वदेवताः।<br>सव्ये तु सर्वगुरवो दक्षिणे हरिमेधसः॥3-3॥ |

| |
|---|
| मध्ये पूज्याः सर्वपीठदेवता एवमेव तु।<br>अनन्तो योगपीठात्मा मन्त्रास्ते चार्धशः स्वयम्॥3-4॥ |
| हृत्पद्मविष्टरासीनमुद्यदर्कोज्ज्वलप्रभम्।<br>सम्भाव्य चार्घ्यपाद्याद्यैरञ्चेद्बगन्धपुष्पकैः॥3-5॥ |
| श्रियं भुवं वासुदेवानन्तेन्द्राद्यावृतीरपि।<br>धूपदीपावथाऽमुर्घ्य त्रिशः पुष्पैश्च पूजयेत्॥3-6॥ |
| गलितैरमृतस्यन्दैश्चिन्नभश्चन्द्रमण्डलात्।<br>सश्रीकपरिवाराय नैवेद्यं विष्णवेऽर्पयेत्॥3-7॥ |
| सम्प्रीतिपूजां त्रिः पुष्पैस्तथा धूपादिमुद्रया।<br>पुनश्च पुष्पाञ्जलिभिस्त्रिस्त्रिः कृत्वा प्रसादयेत्॥3-8॥ |
| पुष्पाञ्जलिं त्रिशः कृत्वा मनसा तु प्रसादयेत्।<br>बहिरञ्चेत्तथा विष्णुं पुरस्तात्पीठदेवताः॥3-9॥ |
| पूर्ववद्देवगुर्वादींश्चतुर्भिर्मनुभिर्यजेत्।<br>अग्न्यादिकोणगानां चेत्पीठपादपदास्थितान्॥3-10॥ |
| विपश्चिद्गरुडं व्यासं दुर्गां चैव सरस्वतीम्।<br>धर्मं ज्ञानं च वैराग्यमैश्वर्यं च ततः परम्॥3-11॥ |
| तन्मूर्धगानधर्मादीन्पूर्वादौ फलकाश्रयात्।<br>मध्येऽध आदिपरमपुरुषाधारशक्ति च॥3-12॥ |

| |
|---|
| कूर्मानन्तौ च पृथिवीं क्षीरार्णवमथोपरि।<br>श्वेतद्वीपं तथा रत्नमण्डपं पद्ममेव च॥3-13॥ |
| अमुं मन्त्रार्कसोमं च वह्निमण्डलमेव च।<br>सं सत्वं रं रजश्चैव तं तमश्च ततः परम्॥3-14॥ |
| आत्मान्तरात्मपरमात्मज्ञानात्मन एव च।<br>विमलादीनष्टदिक्षु मध्ये शक्तीर्नवार्चयेत्॥3-15॥ |
| विमलोत्कर्षणी ज्ञाना क्रिया योगा तथैव च।<br>प्रह्वी सत्या तथेशानाऽनुग्रहा नव शक्तयः॥3-16॥ |
| ताराद्या इम उद्देश्या नत्यन्ता मनवः स्वयम्।<br>मध्येऽर्चये "त्सर्वपीठदेवताभ्यो नम"स्त्विति॥3-17॥ |
| तथा पुन "रनन्ताय योगपीठात्मने नमः"।<br>इति पीठं समभ्यर्च्य स्वासीनं तत्र केशवम्॥3-18॥ |
| विकासयिष्यन्कुर्वीत मूलेन कुसुमाञ्जलिम्।<br>मूलेन व्यापकान्कुर्यात्तालाद्यं च यथोदितम्॥3-19॥ |
| पुष्पेणाऽराध्य मूलेन दत्वाऽर्घ्यं शङ्खवारिणा।<br>ब्रूयादर्घ्यमिदं न्याय्यं पाद्याद्येष्वेवमेव हि॥3-20॥ |
| पाद्य माचमनीयं च मधुपर्कं ततः परम्।<br>पुनराचमनं चेति स्नानात्प्राच्यानि पञ्च च॥3-21॥ |

| |
|---|
| तद्वत्स्नानं च सङ्कल्प्य वस्त्रं भूषणमेव च।<br>यज्ञोपवीतं पुनराचमनं चासनं तथा॥3-22॥ |
| पुष्पाग्रेण जलं दद्यादपि गन्धं त्रिशस्त्रिशः।<br>कूर्चाग्रेणापि वा तत्तत्कर्मसु श्रीपतिं स्मरन्॥3-23॥ |
| उद्यन्नभोरत्नसपत्नरोचिः पद्मामहीबाहुलतोपगूढः।<br>विभूतिमद्भूषणभूषणीयो नारायणोऽयं कमनीयरूपः॥3-24॥ |
| विदोषसम्पूर्णसुखावबोधः स्वामी गदापद्मदरारिधारी।<br>भक्त्या विरिञ्चादिभिरञ्चनीयो श्रीमध्वनाथो दृशमञ्चतान्नः॥3-25॥ |
| इति नारायणं ध्यायन्नम्भश्चन्दनपङ्किलान्।<br>अष्टादशावरान् कुर्यान्मूलेन कुसुमाञ्जलीन्॥3-26॥ |
| अथ श्रियं भुवं प्राञ्चेत्सव्यदक्षिणयोर्हरेः।<br>दिक्ष्वङ्गानि च कोणेषु पञ्चमं तद्बहिः पुनः॥3-27॥ |
| वासुदेवादिकान् दिक्षु केशवादींश्च राशिषु।<br>मेषादिष्वथ मत्स्यादीन् बहिरावरणं ततः॥3-28॥ |
| अनन्तस्तत्र तूपान्त्यो विश्वरूपोऽन्त्य उच्यते।<br>तद्बहिः पृष्ठतोऽनन्तं ब्रह्माणं सव्यतो यजेत्॥3-29॥ |
| पुरो वायुं च गरुडं रुद्रं दक्षिणतो यजेत्।<br>तद्वामतो वारुणीं च गायत्रीं भारतीं तथा॥3-30॥ |

| |
|---|
| सुपर्णीमप्युमामञ्चेततस्तत्र हरिं स्मरेत्।<br>तद्बहिर्दशदिक्ष्वर्च्या इन्द्राग्नी यमनैरृऋती ॥ 3-31 ॥ |
| वरुणो वायुसोमेशानानन्तब्रह्मनामकाः।<br>ताराद्याः स्वयमुद्देश्यः मंत्रास्तदुपरीरयेत्॥ 3-32 ॥ |
| सुरतेजः प्रेतरक्षो जलप्राणपदानि तु।<br>नक्षत्रविद्यानागाख्यलोकेत्येकैकमेव तु ॥ 3-33 ॥ |
| उक्त्वाऽधिपतिमुद्देशं तत्रोक्तं विष्णुपार्षदम्।<br>नमोन्ता इति तन्मन्त्रा अत ऊर्ध्वमयं विधिः ॥ 3-34 ॥ |
| महालक्ष्मीं हरिं चोर्ध्वमिति पुष्पैः समर्चयेत्।<br>घण्टामुद्घोष्य धूपं च दीपं चापि प्रदीपयेत्॥ 3-35 ॥ |
| पुनः पुष्पैस्त्रिरभ्यर्चेत्पुष्पैः स्वान्योजयेद्गुरौ।<br>पुरः स्थण्डिलमालिप्य प्रापणं तत्र वासयेत्॥ 3-36 ॥ |
| सम्पूर्णं सविभागं च घृतेनैतद्विमिश्रयेत्।<br>विभजेत्संस्कृते पात्रे होमार्थं संविभागतः ॥ 3-37 ॥ |
| पुनराज्यैरुपस्तीर्य प्रोक्षेत्तीर्थेन मूलतः।<br>गिरिमुद्रां पद्ममुद्रां दर्शयेदपि सौरभीम्॥ 3-38 ॥ |
| भूमय्याः सुरभेरूधो गलितां संस्मरेत्सुधाम्।<br>मूलमन्त्रं हविः सृष्ट्वा जपेदष्टावरं सुधीः ॥ 3-39 ॥ |

| |
|---|
| पर्युक्षेत्सत्यमन्त्रेण मूलमन्त्रं च सञ्जपेत्।<br>यत्र मन्त्रो न निर्दिष्टस्तत्र मूलं प्रकल्पितम्॥3-40॥ |
| अमन्त्रका क्रिया क्वापि नैवाच्र्यादिषु विद्यते।<br>अमृतोपस्तरं दद्यान्मूलेनाऽराधयेत्सकृत्॥3-41॥ |
| ''जुषध्व''मुक्त्वा "प्राणाय स्वाहे" त्यादि शनैः स्मरेत्।<br>अङ्गुष्ठाद्यङ्गुलीमर्शं कृत्वा प्राणादिदैवतम्॥3-42॥ |
| ''अभ्यवह्रियते सर्वमीशेनेदं सुधात्मकम्।<br>दैवतैः प्रेरितं चन्द्रबिम्बपात्रोपपादितम्''॥3-43॥ |
| इति स्मृत्वा चक्रमुद्रां मूलेन परिवर्तयेत्।<br>ततः स्थण्डिलमालिप्य दिश्यग्नेरग्निमावहेत्॥3-44॥ |
| निक्षिपे "दिन्ध" इत्येध "उद्दीप्यस्वे"ति दीपयेत्।<br>कुर्यात्परिसमूहादीन् पूजयेत्पीठदेवताः॥3-45॥ |
| विकासयेत्सप्तजिह्वं जातवेदाग्निबीजकैः।<br>तत्राथाऽवाहयेद्विष्णुमतः पूर्वोक्तवर्त्मना॥3-46॥ |
| स्वागताद्येन सम्भाव्य न्यसेत्सर्वं च निष्कलम्।<br>पुष्पैराराध्य पर्यग्निं कृत्वा हव्यं घृतप्लुतम्॥3-47॥ |
| हुत्वा व्याहृतिभिः पीठदेवेभ्योऽप्यथ मूलतः।<br>उक्तावरणदेवेभ्योऽप्यथ सम्यक् स्मरन् हरिम्॥3-48॥ |

वैश्वदेवं गृही गृह्यं कुर्याद्भुवि हरेर्बलिम्।

आराध्य पुष्पमर्घ्यं च दत्वाऽङ्गन्यासमाचरेत्॥3-49॥

मूलेनोद्वासयेदुक्त्वा "भगवन्गच्छ गच्छ च"।

"विसर्जयामी"ति चोक्त्वा पुनर्मूलमुदाहरेत्॥3-50॥

आवाह्य व्यूहयेदङ्गं प्रवाहत्प्राक्समूहयेत्।

ततो नत्वाऽभ्यवहृतं स्मृत्वा ह्याराधयेद्धरिम्॥3-51॥

जलमासिच्य मूलेन पिधानीयमिदं वदेत्।

विष्वक्सेनाय दत्वाऽस्मान्नैवेद्यमपवाहयेत्॥3-52॥

स्थलं विशोध्याऽऽचमनं मूलेन परिकल्पयेत्।

मुखवासश्च ताम्बूलमञ्जनं दर्पणं तथा॥ 3-53॥

चामरे पादुकं छत्रं दद्यादर्घ्यादिवत्पुनः।

सम्प्रीतिजार्थं कुर्वीत त्रिशस्तु कुसुमाञ्जलिम्॥3-54॥

दीपाद्दीपान्तराणीव व्यूहयेत्स्वपदे स्वकात्।

धूपायेद्दीपयेत्पुष्पैस्त्रिश आराधयेत्पुनः॥3-55॥

नारायणं नमस्कुर्या "जितन्ते" त्यादिसंस्तवैः।

दीर्घमञ्जलिमाबध्योपविश्याऽऽराधयेत्त्रिशः॥3-56॥

अर्घ्यं समाहितो दद्यात्कुर्याद्ब्रह्मार्पणं पुनः।

तीर्थीकृत्याम्भसः शेषं प्रोक्षेच्चाङ्गानि तैःशुभैः॥3-57॥

| |
|---|
| दद्यात्तीर्थानि भक्तेभ्यो निर्माल्यं शिरसोद्वहेत्।<br>न्यस्याङ्गानि हरेः स्वस्य न्यस्येदङ्गादिकं पुनः॥3-58॥ |
| प्राणायामत्रयं कुर्याद्भूयो भूयः प्रसादयेत्।<br>अर्चाद्ययोग्यनिर्माल्यं पूर्वं स्पृष्ट्वा स्पृशेदपः॥3-59॥ |
| द्वात्रिंशदपराधांश्च ज्ञात्वा ज्ञात्वा विवर्जयेत्।<br>भुक्त्वा पीत्वाऽर्चनं दन्तकाष्ठाभक्त्युपसर्पणम्॥3-60॥ |
| मैथुनानन्तरं चार्चा शवं दृष्ट्वोपसर्पणम्।<br>अर्चान्तरे मूत्रविष्ठाविसर्गौ साश्रुभाषणम्॥3-61॥ |
| नीलवस्त्रावृतस्याप्ती राजान्नात्तिरुपागतिः।<br>उपस्पृश्याविधानैस्तु शुश्रूषोरपि रुष्टता॥3-62॥ |
| अकर्मण्यप्रसूनार्चा रक्तकौपीनवस्त्रता।<br>कृष्णवस्त्रैर्हरेः कर्मविधिः स्पृष्टिस्तमस्यपि॥3-63॥ |
| कामानुसारिता कृष्णवस्त्रस्य परिधूननम्।<br>श्वस्पृष्टिः कोलमांसात्तिर्जालपादाशनं तथा॥3-64॥ |
| उपसर्पः पङ्क्तिले च चितिं स्पृष्ट्वोपसर्पणम्।<br>पिण्याकात्तिश्चोपसत्तुः पोत्रिमांसोपपदानम्॥3-65॥ |
| उपयातुर्मद्यपानं कुसुम्भदलभक्षणम्।<br>परप्रावरणग्राहस्त्वञ्जनादेरकल्पनम्॥3-66॥ |

| |
|---|
| पुष्पादाने धूपदानं हरिधर्तुरुपानहौ।<br>अभेरीहन्तुरभ्याप्तिरजीर्णान्नस्य पूजनम्॥3-67॥ |
| द्वात्रिंशदपराधास्तु कथिता गुरुदोषदाः।<br>वसुन्धरायै कोलेन विष्णुना प्रभविष्णुना॥3-68॥ |
| ''भावैरेवार्चन्त्येके ज्ञानविज्ञानकौशलाः।<br>बुद्ध्याऽविहिंसनपुष्पैर्वा प्रणवेन समर्पयेत्॥3-69॥ |
| वासुदेवात्मकं ब्रह्म मूलमन्त्रेण वा यतिः ''।<br>इति व्याससमृतावुक्तेरपि भारतवर्णनात्॥3-70॥ |
| ''आराधयामि मणिसन्निभमात्मबिम्बे |
| मायापुरे हृदयपङ्कजसंनिविष्टम्।<br>श्रद्धानदीविमलचित्तजलाभिषेकं |
| भावाष्टपुष्पविधिना हरिमर्चयामि''॥3-71॥ |
| इति वाक्योदितं पुष्पं विविच्योक्तं वचोऽन्तरे।<br>''अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः॥3-72॥ |
| सर्वभूतदयापुष्पं क्षमापुष्पं विशिष्यते।<br>ज्ञानपुष्पं तपः पुष्पं ध्यानपुष्पं च सप्तमम्॥3-73॥ |
| सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यति केशवः'।<br>इति भावाष्टपुष्पाणि विविक्तानि वचोन्तरे॥3-74॥ |

अविद्वांसोऽप्यशक्ताश्चेज्जलैः कुर्युः परार्चनम्।

एवमभ्यर्च्य गोविन्दमशीतातिथिभिः सह॥3-75॥

नैवाशीत न दद्याद्वा किञ्चिदप्यनिवेदितम्।

पुनश्च शास्त्रमभ्यस्येन्न कदाचित्परित्यजेत्॥3-76॥

आरभेतोत्तरं सान्ध्यमर्धमस्तमिते रवौ।

मुहूर्तं द्विमुहूर्तं वा ध्यायन्ब्रह्म जपेन्मनून्॥3-77॥

अश्नीत वा हरेः प्रीत्यै शुद्धमन्नं निवेदितम्।

ऋतौ भार्यामुपेयाच्च निषिद्धे नैव वासरे॥3-78॥

पित्रोः क्षयदिने विष्णोर्वासरे तु विशेषतः।

तत्पूर्वोत्तरयोर्वापि सङ्गच्छन्पितृहा भवेत्॥3-79॥

पञ्चदश्योश्चतुर्दश्योः श्रवणे सङ्क्रमे तथा।

जन्मन्यपि व्यतीपाते न कुर्यात् स्त्रीरतिं बुधः॥3-80॥

मुनिः सांशुक ईशाशाभिमुखः स्त्रीरतिं क्रियात्।

वामदेव्यो नाम यज्ञो व्यवायो हरिपूजनम्॥3-81॥

अथाऽऽचम्य मनुस्नायी नाडीस्थे परमात्मनि।

विश्वादेरेकतां ध्यायन् सम्पत्स्य इति चिन्तयेत्॥3-82॥

यत्प्राण्याद्यदपान्याच्च ताभ्यां परमपूरुषम्।

उपासेच्छ्रेष्ठयोगेन स मे सम्प्रीयतामिति॥3-83॥

शौचमासा च धर्माङ्गं प्राणायामोऽपरिग्रहः।

अहिंसा सत्यमस्तेयं ब्रह्मचर्यां तपस्तथा॥3-84॥

तुष्टिर्यज्ञादयो धर्माः स्वाध्यायोऽभ्यर्चनं हरेः।

धारणा श्रवणं चाथ मननं ध्यानमेव च॥3-85॥

समाधिर्निगमान्तानां व्याख्यानं भक्तिरेव च।

उत्तरोत्तरमेतानि कर्तव्यानि विशेषतः॥3-86॥

सौलभ्ये श्रवणादीनामन्यत्सङ्कोचमर्हति।

ततोऽप्यल्पत्वमिच्छेच्चेत्पारिव्राज्यं चरेत्पुमान्॥3-87॥

श्रवणादेर्न सङ्कोचः कदाचित्कापि विद्यते।

विशेषतोऽनुसन्दध्यान्नारायणदिनव्रतम्॥3-88॥

इति योगदीपिकायां तृतीयः पटलः ॥3-88॥

## चतुर्थ पटलः ॥4-41॥

सर्वगीर्वाणमूर्धन्यशेखराङ्घ्रिसरोरुहः।

श्रीमध्वः परमाराध्य एतमेवार्थमब्रवीत्॥4-1॥

''यस्मिन्सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।

निराशीर्निर्ममो याति परं जयति सोऽच्युतः॥4-2॥

स्मृत्वा हरिं समुत्थाय कृतशौचो यथाविधि।

धौतदन्तः समाचम्य स्नानं कुर्याद्विधानतः ॥4-3॥

| |
|---|
| “उद्धृते”ति मृदाऽऽलिप्य द्विषडष्टषडक्षरैः।<br>त्रिर्निमज्याऽऽप्यसूक्तेन प्रोक्षयित्वा पुनस्तथा॥ 4-4॥ |
| मृदाऽऽलिप्य निमज्य त्रिस्त्रिर्जपेदघमर्षणम्।<br>स्त्रष्टारं सर्वलोकानां स्मृत्वा नारायणं परम्॥ 4-5॥ |
| यतश्वासो निमग्नोऽप्सु प्रणवेनोत्थितस्ततः।<br>सिञ्चेत्पुरुषसूक्तेन स्वदेहस्थं हरिं स्मरन्॥ 4-6॥ |
| वसित्वा वास आचम्य प्रोक्ष्याऽचम्य च मन्त्रतः।<br>गायत्र्या चाञ्जलिं दत्वा ध्यात्वा सूर्यगतं हरिम्॥ 4-7॥ |
| मन्त्रतः परिवृत्याथ समाचम्य सुरादिकान्।<br>तर्पयित्वा निपीड्याथ वासो विस्तृत्य चाञ्जसा॥ 4-8॥ |
| अर्कमण्डलगं विष्णुं ध्यात्वैव त्रिपदीं जपेत्।<br>सहस्त्रपरमां देवीं शतमध्यां दशावराम्॥ 4-9॥ |
| आ सूर्यदर्शनात्तिष्ठेत्ततस्तूपविशेत वा।<br>पूर्वां सन्ध्यां सनक्षत्रामुत्तरां सदिवाकराम्॥ 4-10॥ |
| उत्तरामुपविश्यैव वाग्यतः सर्वदा जपेत् |
| ध्येयः सदा सवितृमण्डलमध्यवर्ती |
| नारायणः सरसिजासनसन्निविष्टः।<br>केयूरवान्मकरकुण्डलवान् |

किरीटी हारी हिरण्यमयवपुर्धृतशङ्खचक्रः ॥ 4-11 ॥

गायत्र्यास्त्रिगुणं विष्णुं ध्यायन्नष्टाक्षरं जपेत्।
प्रणम्य देवान्विप्रांश्च गुरूंश्च हरिपार्षदान्॥ 12 ॥

स्मृत्वा सर्वोत्तमं विष्णुं स्वाध्यायेनार्चयेद्धरिम्।
ध्यानप्रवचनाभ्यां वा यथायोगमुपासनम्॥ 4-13 ॥

धर्मेणेज्यासाधनानि साधयित्वा विधानतः।
स्नात्वा सम्पूजयेद्विष्णुं वेदतन्त्रोक्तमार्गतः ॥ 4-14 ॥

वैश्वदेवं बलिं चैव कुर्यान्नित्यं तदर्पणम्।
इष्टं दत्तं हुतं तप्तं पूर्तं यच्चात्मनः प्रियम्॥ 4-15 ॥

दारान्सुतान्प्रियान्प्राणान्परस्मै संनिवेदयेत्।
भुक्तशेषं भगवतो भृत्यातिथिपुरःसरः ॥ 4-16 ॥

भुञ्जीत हृद्गतं विष्णुं ध्यायंस्तद्गतमानसः।
आचम्य मूलमन्त्रेण कोष्ठं स्वमभिमन्त्रयेत्॥ 4-17 ॥

वेदशास्त्रविनोदेन प्रीणयन् पुरुषोत्तमम्।
अहश्शेषं नयेत्सन्ध्यामुपासीताथ पूर्ववत्॥ 4-18 ॥

यामात्परत एवाथ स्वपेद्ध्यात्वा जनार्दनम्।
अन्तराले तथोद्बुद्धः स्मरेत बहुशो हरिम्॥ 4-19 ॥

कायेन वाचा मनसेन्द्रियैर्वा बुध्याऽऽत्मना वाऽनुसृतस्वभावः।
करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत्॥4-20॥

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥4-21॥

उत्तमः पुरषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्यभिभर्त्यव्यय ईश्वरः॥4-22॥

यस्मात्क्षरमतीतोसावक्षराच्चोत्तमो हरिः।
अतो हि लोके वेदे च प्रथितः पुरुषोत्तमः॥4-23॥

यस्तमेवमसंमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति तं सर्वभावेन सर्वदा॥4-24॥

इति गुह्यातमं शास्त्रमिदं तेनोक्तमेव च।
एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च सर्वदा॥4-25॥

रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः।
ब्रह्मा तमाश्रितो नित्यं न हरिः किञ्चिदाश्रितः॥4-26॥

ये तन्मतमिदं नित्यमनुतिष्ठन्ति मानवाः।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते संसृतेर्भयात्॥4-27॥

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति तन्मतम्।
सर्वज्ञानविमूढांस्तान् विद्यान्नष्टात्मचेतसः॥4-28॥

| |
|---|
| द्वावेव सर्गौ लोकेऽस्मिन् दैव आसुर एव च।<br>विष्णुभक्तिपरो दैवो विपरीतस्तथाऽऽसुरः ॥ 4-29 ॥ |
| स्मर्तव्यः सततं विष्णुं विस्मर्तव्यो न जातुचित्।<br>सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥ 4-30 ॥ |
| धर्मो भवत्यधर्मोऽपि कृतो भक्तैरमेशितुः।<br>पापं भवति धर्मोऽपि यो न भक्तैः कृतो हरेः ॥ 4-31 ॥ |
| तन्मना भव तद्भक्तो तद्याजी तन्नमस्क्रियः।<br>नित्यं भवेच्च तन्निष्ठो बुभूषुः पुरुषस्ततः ॥ 4-32 ॥ |
| एष नित्यः समाचारो गृहिणो वनिनस्तथा।<br>वैश्वदेवं बलिं दन्तधावनं चाप्यृते बटोः ॥ 4-33 ॥ |
| एवमेव यतेः स्वीयवित्तेन तु विना सदा।<br>मूलमन्त्रैः सदा स्नानं विष्णोरेव च तर्पणम् ॥ 4-34 ॥ |
| विशेषो निष्क्रिय यतेरजलाञ्जलिता तथा।<br>तर्पणं तु हरेरेव यतेर्नान्यस्य चोदितम् ॥ 4-35 ॥ |
| समिद्धोमो वटोश्चैव स्मृत्वा विष्णुं हुताशने।<br>सर्ववर्णाश्रमैर्विष्णुरेक एवेज्यते सदा ॥ 4-36 ॥ |

रमाब्रह्माद्यस्तस्य परिवारत एव तु।
कविं पुराणमनुशासितारमणोरणीयां समनुस्मरेत्तम्।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात्॥ 4-37॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे।
सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते॥ 4-38॥

धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान्प्रदिशश्चतस्रः।
तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते॥ 4-39॥

आनन्दतीर्थमुनिना व्यासवाक्यसमुद्धृतिः।
सदाचारस्य विषये कृता सङ्क्षेपतः शुभा॥ 4-40॥

'अशेषकल्याणगुणनित्यानुभवसत्तनुः।
अशेषदोषरहितः प्रीयतां पुरुषोत्तमः'॥ 4-41॥

इति योगदीपिकायां चतुर्थः पटलः॥ 4-41॥

## पञ्चमः पटलः॥5-68॥

दशम्यां वर्जयेद्भोगानञ्जनाभ्यञ्जनादिकान्।
अमधुक्षारलवणस्सकृदश्नीत सुव्रतः॥ 5-1॥

परेद्युः प्रातरुत्थाय हरिं स्मृत्वा विशेषतः।
सङ्कल्पयेदद्य कुर्यामुपवासव्रतं त्विति॥ 5-2॥

| |
|---|
| ततस्त्रिषवणास्नायी कृत्वोक्तं तदनन्तरम्।<br>आवर्तयेच्छ्रुतिगिरो निशि जागरणं चरेत्॥5-3॥ |
| श्रुत्वा व्याख्याय वा किञ्चित्कालं साकं हरिप्रियैः।<br>कुर्याच्च पुरतो विष्णोर्नृत्तसङ्कीर्तनादिकम्॥5-4॥ |
| अन्त्ययामे ततः स्नातो जपेन्मूलं समाहितः।<br>विष्णोः सपर्यां कुर्वीत यथाशक्तिप्रपञ्चनाम्॥5-5॥ |
| निवेद्य तत्र नैवेद्यं स्नपयेत्पौरुषं चरुम्।<br>ईशस्य दक्षिणे भागे स्वासीत प्राङ्मुखो मुनिः॥5-6॥ |
| कारयेत्स्थण्डिलं शुच्यामिषुमात्रं परं भुवि।<br>उल्लिखेत्समिधा रेखाः षट् पश्चादुदगायताः॥5-7॥ |
| प्रागायते दक्षिणोदिग्भागयोस्तदमिश्रिते।<br>त्रिस्त्रो मध्ये तथाऽभ्युक्षेत्तत्राग्निं प्रणिधापयेत्॥5-8॥ |
| समिद्ध्यां परिगृह्यान्वादध्यात्तत्राथ देवताः।<br>अग्निः सोमश्च पुरुषस्तथाऽग्निस्स्विष्टकृच्च ताः॥5-9॥ |
| कृत्वा रज्जुं बर्हिरिध्मौ निबध्योदगधो न्यसेत्।<br>त्रिशः परिसमूह्याथ प्रागादिषु परिस्तरेत्॥5-10॥ |
| दक्षिणं तूर्ध्वमूलाग्रमधोमूलाग्रमुत्तरम्।<br>त्रिः पर्युक्ष्योदगग्नेस्तु न्यंचि पात्राणि सादयेत्॥11॥ |

| |
|---|
| द्विशः प्रणीताज्यस्थाल्यौ सृक् सृवौ पाककर्मणे।<br>चरुस्थालीं मेक्षणं च प्रोक्षणीं संविभाजिनीम्॥ 12॥ |
| कुर्यात्पवित्रौ प्रादेशौ कुशौ साग्रावगर्भकौ।<br>अङ्गुष्ठानामिकाभ्यां ते त्रिर्नासोर्ध्वं परीमृजेत्॥ 5-13॥ |
| उत्तान्यप्रोक्षणीपात्रं पवित्रे तत्र विन्यसेत्।<br>आसिच्यापः पवित्राभ्यां त्रिः प्रागुत्पवनं क्रियात्॥ 5-14॥ |
| अङ्गुष्ठानामिकाभ्यां सङ्गृह्य नासांतयोः पृथक्।<br>उत्तानाभ्यां तु पाणिभ्यां सर्वत्रोत्पवनं मतम्॥ 5-15॥ |
| ताभिरुक्षेत्त्रिशस्ताभ्यः पवित्रोत्तानपाणिना।<br>पात्राण्युत्तान्यापः स्पृष्ट्वा प्रोक्षेत्सेध्मानि पूर्ववत्॥ 5-16॥ |
| ब्रह्मा स्याच्चेद्दक्षिणतो निरस्योपविशेत्पुनः।<br>प्रणीतपात्र आधाय पवित्रे तत्र पूर्ववत्॥ 5-17॥ |
| अप आसिच्य पाणिभ्यां प्रणयेत्प्राणसम्मितः।<br>कुशेष्वग्नेरुदङ्ग्ह्स्येत्परिदध्यात्कुशैरपि॥ 5-18॥ |
| निर्वपेच्चतुरो मुष्टीन्पुरुषायाथ तण्डुलान्।<br>पवित्राभ्यां तथा प्रोक्ष्य त्रिक्षालं श्रपयेद्वसौ॥ 5-19॥ |
| स्थाल्यां पवित्रे विन्यस्य तत्राभ्यासेचयेत् घृतम्।<br>अपवाह्योदगङ्गारान्बर्हिस्तत्र च विन्यसेत्॥ 5-20॥ |

| |
|---|
| ततःप्रज्वाल्य दर्भाभ्यां कुशाग्रे क्षालिते क्षिपेत्।<br>ततः पर्यग्नि कुर्वीत त्र्यावर्तं हविषा सह॥ 5-21॥ |
| अपः सृष्ट्वोदगुद्वास्य तदङ्गारांश्च योजयेत्।<br>"सवितुष्ट्वे"ति मन्त्रेण कुर्यात्पूर्ववदुत्पवम्॥ 5-22॥ |
| सकृन्मन्त्रेण तूष्णीं द्विः प्रोक्ष्य प्रास्येद्विभावसौ।<br>बहिष्कृत्य प्रणीतास्तु बर्हिरानीय पश्चिमे॥ 5-23॥ |
| अग्नेर्विश्लथ्यतद्रज्जुं न्यस्य तत्र प्रसारयेत्।<br>तत्र न्यस्याऽज्यमुत्ताप्य दर्भमुष्टिसृवौ सृचम्॥ 5-24॥ |
| अन्तर्बहिश्च मूलं च संमृजेद्दर्भमुष्टिना।<br>प्रोक्ष्योत्ताप्य पुनर्मुष्टिं प्रहरेत्प्रोक्ष्य तं वसौ॥ 5-25॥ |
| पक्वं सृवेणाभिघार्य हविरुद्वासयेदुदक्।<br>तत्राभिघार्य बर्हिष्यादधीताऽऽज्यस्य दक्षिणे॥ 5-26॥ |
| पाणिना "पुरुषस्येद" मिति स्मृत्वाऽभिमृश्यतु।<br>स्मृत्वा सुधामयं तस्य प्रोक्षणं चोपरि क्षिपेत्॥ 5-27॥ |
| निदध्यात्परिधीन्पश्चाद्दक्षिणोत्तरतः क्रमात्।<br>स्मृत्वा प्राक्सूर्यमादध्यादिध्मादूर्ध्वं समिद्वयम्॥ 5-28॥ |
| संसाध्य यज्ञपुरुषमग्नावावाहयेत्सुधीः।<br>इध्मादानाय तद्रज्जुं प्रणीताप्सु विनिक्षिपेत्॥ 5-29॥ |

| |
|---|
| अभिघार्य प्रणीतासु तत एतां निधापयेत्।<br>संस्कृत्य पुरुषं गृह्णन्निध्मं दक्षिणपाणिना॥ 5-30॥ |
| जुहुयान्मन्त्रमुक्त्वा "ऽय"मिति मन्त्रं सुमन्त्रितम्।<br>प्राजापत्यावथाऽऽघारौ वायुनैर्ऋतदिक् स्पृशौ॥ 5-31॥ |
| अग्नीशानावसानौ द्वौ सृवाज्येनाभिघारयेत्।<br>जुहुया "दग्नये स्वाहा", "सोमाये"ति तु चक्षुषि॥ 5-32॥ |
| उदग्दक्षिणतश्चाथ पुङ् ऋग्भिर्जुहुयात्क्रमात्।<br>सृवाज्यं प्रथमं पश्चाद्धविषो द्विरवद्य च॥ 5-33॥ |
| पञ्चावच्यवदाय त्रिर्हविः प्रत्यभिघारयेत्।<br>अवत्तमभिघार्याग्नौ पुरस्ताज्जुहुयाद्धुतम्॥ 5-34॥ |
| वामेनाऽऽमृद्य हृदयं हविर्दक्षिणपाणिना।<br>गृह्णन् मन्त्रं समुच्चार्य स्वाहान्ते जुहुयात्सुधीः॥ 5-35॥ |
| उपरिष्टाच्च हुत्वाऽऽज्यं सौविष्टीकृतमन्त्रतः।<br>अवद्येत्सकृदाज्यं द्विर्हविर्नाऽघारयेदिह॥ 5-36॥ |
| पुरो हुत्वा "यदस्ये"ति मन्त्रान्ते होममाचरेत्।<br>हुत्वाऽऽज्यं परिधेरन्तः सृवा सिञ्चेदपो बहिः॥ 5-37॥ |
| हुत्वा तु याजसमिधं व्याहृत्या तु समस्तया।<br>स्रौवीं पूर्णाहुतिं कृत्वा परिधीर्जुहुयात्ततः॥ 5-38॥ |

| |
|---|
| अथ रज्जुं च विश्लथ्य प्रोक्ष्य प्रास्येद्विभावसौ।<br>अपः स्पृष्ट्वा हरिं स्मृत्वा पुष्पैराराधयेत्सुधीः ॥5-39॥ |
| स्रुवेण जुहुयाद्ब्रह्म प्रायश्चित्ताहुतीरथ।<br>"अया" "अत इदं" मन्त्रैः शुक्लैश्चाथ समापयेत्॥5-40॥ |
| अभ्यानीय प्रणीतापो मार्जयेत्पञ्चदिक्षु च।<br>दक्षिणां विष्णुभक्तेभ्यो यावत्सामर्थ्यमर्पयेत्॥5-41॥ |
| बर्हिष्यापोऽथ निनयेत्सपर्यां च समापयेत्।<br>पुरुषाय पुनः प्राप्र्य हुतशेषं हविर्घृतम्॥5-42॥ |
| गुरुभ्यः प्रापणं प्राप्र्य शेषाभ्यां पारणं क्रियात्।<br>अथ नारायणश्रीमल्लीलावहमहोत्सवैः॥5-43॥ |
| नृत्तसङ्कीर्तनावर्तैर्दिनशेषं समापयेत्।<br>उक्तन्यायेन जन्मर्क्षे आयुष्यं होममाचरेत्॥5-44॥ |
| पुमा "न्मुञ्चामि" सूक्तेन त्विन्द्राग्नी तत्र देवते।<br>प्राजापत्यऋषिर्विष्णुर्भक्तिमान्यक्ष्मनाशनः॥5-45॥ |
| छन्दस्त्रिष्टुबनुष्टुप् च इन्द्राग्नी नृहरी स्मृतौ।<br>नृवाज्यायुःस्समृद्ध्यै स्यान्नृसिंहो मृत्युनाशनः॥5-46॥ |
| ऋचाऽन्त्यया यजेच्चन्द्रमण्डलस्थं नृवाजिनम्।<br>इत्यैतरेयिनः प्राहुस्तैत्तिरीये विशिष्यते॥5-47॥ |

समिधा स्थण्डिले विध्येन्मध्ये त्रिः प्रत्यगादिकम्।
तथा दक्षिणतश्चैव त्रिश उत्तरस्त्रिशः ॥5-48॥

अभ्युक्ष्य सिकतास्तत्र सर्वतश्च प्रसारयेत्।
रेखाः प्रागायता मध्ये दक्षिणोत्तरतो लिखेत्॥5-49॥

मध्ये प्रत्यक्पूर्वतश्च तिस्रः स्युरुदगायताः।
दर्भेष्वत्राग्निमाधाय समिध्य ज्वलितं वसुम्॥5-50॥

बद्धाञ्जलिर्दर्भपाणिर्जुष्ट इत्युपतिष्ठतात्।
अन्वाधाय न्यसेद्बर्हिर्न रज्वा तत्र बन्धनम्॥5-51॥

परिसम्मूह्य पर्युक्षेत्सकृत्पश्चात्परिस्तरः।
आज्योद्वासात्पूर्वमेव पात्रसम्मार्जनं भवेत्॥5-52॥

आज्यस्योत्पवनं तूष्णीं पुनराघारसंयुतः।
इध्मं गृहीत्वा "तदित" इत्याद्यैः परिषेचयेत्॥5-53॥

तारेण जुहुयादिध्मं तत्र नारायणं स्मरन्।
प्रजापतय इन्द्राय स्वाहेत्याघारयोर्हुतिः॥5-54॥

चक्षुरन्ते "युक्त" आद्या मुख्या स्युर्द्वादशाहवाः।
"युक्तो वह" "चतस्र"श्चे "त्यानो भद्रा"स्ततः परम्॥5-55॥

"विरूपाक्ष" "विरूपाक्षं" "यातिरश्चीनि पद्यसे"।
"संरादिन्यै" "प्रसादिन्यै" व्याहृत्यन्ता इतीरिताः॥5-56॥

| |
|---|
| अथ स्वावत्तधर्मेण पक्वहोमं समाचरेत्।<br>"पुरुषः" "सतदि"त्याभ्यां द्विरन्ते तारयोगतः॥5-57॥ |
| "सहस्रशीर्षे"त्याद्यैश्च मन्त्रैराज्याहुतीः क्रियात्।<br>विभज्य स्विष्टहोमार्थं सम्पातैः सेचयेच्चरुम्॥5-58॥ |
| "हव्यवाहं" "स्विष्टमि"ति मन्त्रौ सन्धाय तारतः।<br>स्वाहान्ते तु हरिं स्मृत्वा स्विष्टकृद्होम इष्यते॥5-59॥ |
| परिध्यन्तर्बहिश्चेति स्विष्टकृद्धर्मिसेचनम्।<br>अनुयाद्रज्जुपूर्णांस्तु हुत्वा तान्परिधीनथ॥5-60॥ |
| जयाद्यैराहुतीः कुर्याच्चतुर्नवतिसङ्ख्यकाः।<br>परिषिच्यादितेयाद्यैः परिधीन्जुहुयात्पुनः॥5-61॥ |
| पश्चिमे द्वे समर्प्याग्नौ प्रणीतं निनयेत्ततः।<br>न्यायेनानेन कुर्वीत महायुष्यं विचक्षणः॥5-62॥ |
| ब्रह्मानारायणौ विश्वरूपा लक्ष्मीस्ततः परम्।<br>वसरुद्रादित्यमरुत्साध्यर्षय उदाहृताः॥5-63॥ |
| यक्षगन्धर्वपितरो विश्वेदेवास्तथर्भवः।<br>सर्पाङ्गिरस इत्येते देवताः परिकीर्तिताः॥5-64॥ |
| "यो ब्रह्मे"त्युपरिष्टात्तु "भ्राजमान" इतीरयेत्।<br>सतारसन्धिस्वाहान्तपक्वहोमं समाचरेत्॥5-65॥ |

दाक्षयिण्यः श्रियं देवीमेको ब्रह्म वसूनिति।
अष्टाभिर्ऋग्भिरेताभिः प्रत्येकं जुहुयाद्घृतम्॥5-66॥

शतं शतं सहस्रं वा सम्पातं चावसेचयेत्।
तत्र तत्र स्मरन्विष्णुं स्विष्टाद्यं पूर्ववत्क्रियात्॥5-67॥

सम्पातशेषं सञ्ज्ञप्य यजमानाय सन्दिशेत्।
चरुणा सह तत्प्राश्यदीर्घमायुः प्रपद्यते॥5-68॥

इति श्रीयोगदीपिकायां पंचमः पटलः॥5-68॥

## षष्ठः पटलः ॥6-65॥

नित्यं सम्प्रीतये विष्णोराचरन्वासरव्रतम्।
कार्तिके श्रावणे मासे माघे वा पूजयेद्धरिम्॥6-1॥

सुलक्षणे महीभागे मण्डलं कारयेद्बुधः।
मृदमूर्ध्वां परित्यज्य शुद्धया तत्प्रपूरयेत्॥6-2॥

चतुस्तुङ्गं तु पादोनसप्तहस्तमितं शुभैः।
लक्षणैश्चित्रितं चारुफलकैः परिवारितम्॥6-3॥

स्तम्भाद्बहिर्वृतं भित्त्या चतुर्द्वारोपशोभितम्।
तन्मध्ये वेदिकां कुर्यान्मण्डलस्यानुकूलतः॥6-4॥

सुलक्षणां दृढां श्लक्ष्णां किञ्चिदुन्नतमध्यमाम्।
कुर्यादङ्कुरपात्राणि द्वादश द्विस्त्रिरेव वा॥6-5॥

| |
|---|
| पालिका घटिकाश्चाथ शरावा इति ते त्रिधा।<br>पालिकानां तु पीठस्य चतुरङ्गुलमुन्नतिः॥6-6॥ |
| द्विस्तावद्वृत्तविस्तारः सन्धिरेकाङ्गुलोन्नतिः।<br>सन्धेरुपरि पात्रस्य विंशदङ्गुलमुन्नतिः॥6-7॥ |
| षोडशाङ्गुलविस्तारं तदन्तर्बिलमुच्यते।<br>तदर्धविस्तरः कण्ठो मुखं षोडशविस्तरम्॥6-8॥ |
| घटिकापीठवृत्तं तु चतुरङ्गुलविस्तृतम्।<br>उत्सेधो द्व्यङ्गुलमितः सन्धिरेकाङ्गुलोन्नतिः॥6-9॥ |
| स्वयं तु षोडशोत्सेधो बिलं तावत्सुविस्तृतम्।<br>चतुरङ्गुलविस्तारं मुखं तु परितोऽस्य च॥6-10॥ |
| तावन्मानानि वक्त्राणि चत्वारि स्युः पदं हरेः।<br>पीठसन्धी शरावस्य घटिकावदुदाहृतौ॥6-11॥ |
| द्वादशाङ्गुलमुत्सेधो बिलं तावत्सुविस्तृतम्।<br>तयोश्च पालिकावद्वा पीठलक्षणमुच्यते॥6-12॥ |
| एवमङ्कुरपात्राणि कारयेदौपदेशिकः।<br>वायुसोमेशशक्राणां दिक्ष्वासामन्तरेऽपि वा॥6-13॥ |
| मण्डलस्याविदूरे तु कुर्यादङ्कुरमण्टपम्।<br>तत्र कुर्याच्चतुष्षष्टिपदानि सुसमाहितः॥6-14॥ |

| |
|---|
| द्यन्तरे वीथिकां कुर्यादेवं पङ्क्तित्रयं भवेत्।<br>अथ पङ्क्तिद्वयं वा स्यादेका वा पात्रसङ्ख्यया॥6-15॥ |
| प्रतिकोष्ठं स्वस्तिकानि कृत्वा चूर्णैः प्रपूरयेत्।<br>पीतरक्तासितसितैरग्निकोणादिकान् गृहान्॥6-16॥ |
| अग्न्यादीशानपर्यन्तं व्रीहींस्तेषु प्रपूरयेत्।<br>कुशानास्तारयेत्तेषु साक्षतेषु सकूर्चकान्॥6-17॥ |
| पालिकापूर्वतो मध्ये घटिकाः पश्चिमे तथा।<br>शरवा दक्षिणाद्यं वा वस्वादिस्वस्तिकान्तरे॥6-18॥ |
| तां भुवं परितो लिख्वा दूर्वाक्षतपुरोगमैः।<br>अलङ्कृत्य प्रदीपं च कारयेद्यावदुत्सवम्॥6-19॥ |
| मृद्वालुकाकरीषैः स्वशिष्यैरेव समाहृतैः।<br>श्लक्ष्णैः संशोधितैस्तानि पूरयेदुत्तरोत्तरम्॥6-20॥ |
| सकेशवाद्यैर्द्विषडक्षराक्षरैर्बीजानि वा गन्धपयोनिशाम्बुभिः।<br>विशोधितानि क्रमशः पृथक् पृथक् पात्रेषु तेषां पुरतो निधापयेत्॥ |
| मुद्गाढयवनिष्पावान् सर्षपान् माषकङ्गुकान्।<br>तिलशालिश्यामराजमाषखल्वांश्च साधयेत्॥6-22॥ |
| पुरतः पालिकादीनां शरावेषु पृथक् पृथक्।<br>बीजानां देवता एषां विष्णुश्रीब्रह्मवायवः॥6-23॥ |

| |
|---|
| ईशेन्द्रस्कन्दधर्मार्काश्चन्द्रवारीशवह्वयः।<br>चक्रशार्ङ्गगदापद्मधरं नारायणं त्विह॥6-24॥ |
| प्रसाद्य स्थण्डिले विघ्नं दीपाद्यैः पूजयेत्सुधीः।<br>नान्दीपूजां ततः कृत्वा पुण्याहं वाचयेन्निजैः॥6-25॥ |
| स्वस्ति वाच्य द्विजश्रैष्ठैः स्वाध्यायमपि जापयेत्।<br>देवं समासतोऽभ्यर्च्य पालिकादिषु चार्चयेत्॥6-26॥ |
| केशवादींश्चतुर्विंशद्वादशात्मादिकानपि।<br>केशवादीनेव चार्चेत्तदादीन्द्वादशैव वा॥6-27॥ |
| बीजेषूद्यत्सुधारश्मि तद्देवान्तः स्थितं हरिम्।<br>तत्तन्नामानमभ्यर्चेत्तत्तन्मन्त्रैः पृथक् पृथक्॥6-28॥ |
| धूपदीपनिवेद्याद्यं सहैवैषां प्रकल्पयेत्।<br>पात्रे मूलेन संयुक्तबीजेष्वर्चेत्सुधारुचिम्॥6-29॥ |
| स्पृष्ट्वा तान्यौषदीसूक्तं जपेत्तत्त्व हरिं स्मरन्।<br>शुभं मुहूर्तं विप्रेन्द्रैर्विधाप्य कृतदक्षिणम्॥6-30॥ |
| वाद्यान्यावाद्य शङ्खादीनातोद्यन्वाद्य उद्यतः।<br>प्रणतः समनुज्ञातो देवब्राह्मणपुङ्गवैः॥6-31॥ |
| “जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।<br>सुब्रह्मण्य नमस्तेऽस्तु नमःपुरुषपूर्वज”॥6-32॥ |

इति मन्त्रेण बीजानि पूर्वोक्तक्रमयोगतः।

आवपेत्पालिकाद्येषु कूर्चपाणिः स्मरन्हरिम्॥6-33॥

तथैव तेन मन्त्रेण सेचयेच्च निशाम्बुभिः।

सान्द्रेण महता तानि बहिर्योगेन वेष्टयेत्॥6-34॥

जलपुष्पनिवेद्याद्यैस्त्रिकालं तान्प्रपूजयेत्।

कूर्चपाणिर्जलं सिञ्चेद्गुरुर्न्यूनातिरेकवित्॥6-35॥

निशास्वैन्द्राद्यष्टदिक्षु स्थण्डिलान्युपलिप्य तु।

तत्र दर्भांश्च कूर्चं च प्राङ्मुखो विन्यसेत्क्रमात्॥6-36॥

"भूतग्रहेभ्यो नम" इत्याद्यैर्दद्याद्दिने बलिम्।

पितृणां यक्षगन्धर्वब्रह्मणां च ततः क्रमात्॥6-37॥

"ग्रहेभ्यो नम" इत्युक्त्वा रुद्रविष्ण्वोस्ततः परम्।

"तत्पार्षदेभ्य" इत्युक्त्वा परितो विकिरेद्बलिम्॥6-38॥

भूतक्रूरेण मिश्रं तु सप्तरात्रमितीरितम्।

अतिरेके तु रात्रीणां वैष्णवानेव पूजयेत्॥6-39॥

तत्तद्विशेषान्कूरेषु सौलभ्ये योजयेत्सुखम्।

न मायिभिः प्रवेष्टव्यं नाशुद्धैर्न च लालसैः॥6-40॥

सुगुप्ते मण्डले तस्मिन्वैष्णवाः सुखमासताम्।

महादिनत्रयात्पूर्वं शुद्धैर्भागवतैर्द्विजैः॥6-41॥

| |
|---|
| स्वाध्यायानाचरेद्भक्त्या श्रीविष्णुः प्रीयतामिति।<br>अश्वत्थौदुम्बरवटप्लक्षानि फलकानि वै॥ 6-42॥ |
| एकहस्तमितान्यष्टाङ्गुलविस्तारभाञ्जि च।<br>तावतोर्ध्वाधरोर्ध्वाणि तद्दण्डान्पञ्चहस्तकान्॥ 6-43॥ |
| हस्तार्धानि च शूलानि तोरणार्थं विधापयेत्।<br>विदापयेद्ध्वजानष्टौ सङ्क्षिप्तान्वा सुयाज्ञिकान्॥ 6-44॥ |
| विनिर्मेयाः पताकाश्च तत्तद्वर्णविशेषतः।<br>शोणो रौग्मस्तथा नीलः सितः पीतोऽपरः शितिः॥ 6-45॥ |
| सितो विविधवर्णश्च पताकावर्णविभ्रमः।<br>होतृको वेदिकां मुक्त्वा वारीशमरुदन्तरे॥ 6-46॥ |
| मण्डपे कुण्डमादध्याद्दीपविघ्नार्चनादिकम्।<br>स्थण्डिले तत्र सूत्राणि पातयेत्सुसमस्थले॥ 6-47॥ |
| चतुर्विंशाङ्गुलमितं चतुरस्त्रं यथा भवेत्।<br>अथ तां प्रखनेद्भूमिं तावदङ्गुलमानतः॥ 6-48॥ |
| तदर्धं षष्ठभागं वा तां मृदं पूर्वतस्त्यजेत्।<br>तिस्त्रस्तु मेखलाः कार्या एका सङ्क्षेपकर्मणि॥ 6-49॥ |
| आद्यादित्र्यङ्गुलोपेतां वसुमानेन मध्यम्।<br>अन्त्या वेदाङ्गुलिमिता खातैकाङ्गुलिदूरगा॥ 6-50॥ |

चतुरङ्गुलविस्तारा प्रत्यग्योनिं प्रकल्पयेत्।

द्वादशाङ्गुलविस्तारा दीर्घा पञ्चदशाङ्गुला॥ 51॥

निविष्टार्धाङ्गुलीकुण्डमध्ये सूत्रक्रमोन्नता।

पूर्वतोऽश्वत्थपत्राभा प्रत्यङ्गुलं च कल्पयेत्॥ 6-52॥

चतुरस्रस्थलारब्धं तिथ्यङ्गुलमितोन्नतम्।

परिधेस्तत्र कुर्याद्वारेधिमध्यममेखलम्॥ 6-53॥

अलक्षणकृतं कुण्डं कुलक्षयकरं भवेत्।

सर्वत्र सुसमं कुर्यादतो मानैः समाहितः॥ 6-54॥

कोणेषु याज्ञियान्वार्क्षाशङ्कून्विस्रम्भयेदिह।

वर्तयेत्परितो वेदिं दिक्षुकुण्डानि चाष्टसु॥ 6-55॥

तुर्यस्रं सुभगाकारमर्धेन्द्वाभं त्रिकोणगम्।

वृत्तं षडस्रं पद्माभमष्टास्रं चेशदिग्गतम्॥ 6-56॥

आचार्यकुण्डमानेन प्रोक्तं तुर्यस्रलक्षणम्।

तुर्यस्रं प्रकृतिं कृत्वा वर्ण्यान्यन्यानि सर्वशः॥ 6-57॥

कुर्वीत कोणसूत्राणि मूलपश्चिमकोष्ठयोः।

तन्मध्ये सूत्रमाविध्य भ्रामयेन्मूलतो बहिः॥ 6-58॥

मध्यसूत्रस्य षष्ठांशे पूर्वतो बहिरङ्कयेत्।

वृत्तान्तयोस्तु तत्राङ्के कुर्यात्सूत्रद्वयं बुधः॥ 6-59॥

उदक्यं चाङ्गुलं त्यक्त्वा वर्तयेदार्धचन्द्रकम्।
मध्यसूत्रचतुर्भागे बहिः प्राक्प्रत्यगङ्कयेत्॥6-60॥

तन्मध्यात्प्रत्यगापादमङ्कयेत्पार्श्वयोर्द्वयोः।
तयोर्मिथश्च तत्राङ्के सूत्राण्येवं त्रिकोणगम्॥6-61॥

मध्यसूत्राष्टमांशेन बहिर्वृत्तं तु वर्तुलम्।
मध्यसूत्राद्बहिः प्रत्यक् प्राक् च षष्ठांशतोऽङ्कयेत्॥6-62॥

मत्स्यौ कुर्यादुभयतो मध्यादङ्काच्च पार्श्वयोः।
तेषु सूत्राणि गृह्णीयात्कुण्डमेवं षडस्रकम्॥6-63॥

मित्रांशतोत्तराङ्गांशान्बहिर्दिक्ष्वङ्कयेद्बुधः।
तत्र तत्र मिथो गृहणन्नष्टौ मत्स्यान्प्रकल्पयेत् ॥6-64॥

एवं लक्षणयुक्तानि कुर्यात्कुण्डानि वैष्णवः।
तुर्यस्रकुण्डवत्तेषां मानखातादिलक्षणम्॥6-65॥

इति योगदीपिकायां षष्ठः पटलः ॥6-65॥

## सप्तमः पटलः ॥7-62॥

आचार्यो विधिवत्स्नात एकादश्यां धृतव्रतः।
सन्तर्प्य पूज्यदेवादि कुर्यान्मण्डलसंस्कृतिम्॥7-1॥

चतुर्भिर्मूर्तिपैः सार्धं संवीतो नववाससा।
स्वलङ्कृतः सोत्तरीयः प्रत्यग्द्वास्स्थौ प्रपूजयेत्॥7-2॥

प्रविश्य मण्डपं विप्रैरनुज्ञातः समूर्तिपः।

वेद्याः पश्चिमतस्तिष्ठन्नस्त्रदृष्ट्याऽवलोकयेत्॥7-3॥

तालत्रयं च दिग्बन्धं कुर्यात्प्राकारमर्चिषः।

स्मरेद्बद्धाञ्जलिर्दिक्षु सायुधानिन्द्रपूर्वकान्॥7-4॥

वज्राद्यायुधमुद्राश्च दर्शयेत्तत्र तत्र च।

वज्रशक्ती दण्डखड्गौ पाशाङ्कुशगदास्तथा॥7-5॥

शूलार्यब्जान्यधश्चोर्ध्वमितीन्द्राद्यायुधानि च।

ततः प्रदक्षिणीकृत्य नैरृते मण्डपस्य च॥7-6॥

आसीनः संस्मरन्विष्णुं देहशुद्धिं समाचरेत्।

समाधानेन पूर्वोक्तषडध्वक्रमयोगतः॥7-7॥

तत आत्मानमभ्यञ्चेद्रूपविघ्नेश्वरानपि।

पलाशशाखादर्भार्घ्या सहदेवीसमन्विता॥7-8॥

गोमयाम्बूनि सिद्धार्थान्दर्भमुष्टिद्वयं तथा।

दशपुष्पाणि सत्सूत्रदर्भरामोषधीव्रजः॥7-9॥

एकं दर्भाग्रमूलं च चन्दनं पञ्चगव्यकम्।

देवी च दूर्वामधुकृन्मुसल्यः क्रान्ता हरेरञ्जलिकारिका च।

लक्ष्मी च भद्राः मघवल्लिका च सम्मोहिनीत्थं कुसुमा दशैते॥7-10॥

| |
|---|
| इत्येतानि पुरस्तत्र साधयेयुर्हि मूर्तिपाः।<br>स्पृशेत्तान्यस्त्रमन्त्रेण गुरुश्चक्रायुधं स्मरन्॥7-11॥ |
| मार्जयेद्विष्णुगायत्र्या ब्रह्मवृक्षस्य शाखया।<br>आग्नेयादीशपर्यन्तं मण्डपं सर्वतः सुधीः॥7-12॥ |
| विश्लथ्य मार्जनीं प्रास्य दूरतोऽप उपस्पृशेत्।<br>तत्रोक्षेद्गोमयाम्बूनि वायुबीजेन कौशलात्॥7-13॥ |
| तेन बीजेन लिम्पेच्च सम्यक् प्रक्षालयेत्करौ। |
| सिद्धार्थानस्त्रमन्त्रेण शतवाराभिमन्त्रितान्॥7-14॥ |
| पात्रात्त्रिरञ्जलौ कृत्वा विकिरेन्मनुनाऽमुना।<br>तालत्रयादिकं कृत्वा मार्जयेद्दर्भमुष्टिना। 15॥ |
| तस्मिञ्शरावे सम्मार्ज्य न्यस्य तानन्तरे क्षिपेत्।<br>स्पृष्ट्वाऽपश्चक्रमन्त्रेण पुष्पैरस्त्रं प्रयोजयेत्॥7-16॥ |
| दर्शयेच्चक्रमुद्रां च पूर्वादिदशदिक्षु च।<br>वेदिकायां समासीनो दर्भाभ्यां तत्स्थलं स्पृशेत्॥7-17॥ |
| आपातालं स्मरन्देवीं भुवं तेजःसुधामयीम्।<br>तत्तत्तत्वगतान्दोषानाधारोद्भूतवायुना॥7-18॥ |
| शोषयेत्परमं ध्यायन्प्राणायामेन सर्वतः।<br>अनन्तोत्थनृसिंहाग्निज्वालाभिस्तान् दहेत्पुनः॥7-19॥ |

| |
|---|
| महीगतौषधीशानमण्डलोद्गलितामृतैः।<br>प्लावयेत्सर्वतो देशं न्यसेल्लिप्यादिकं ततः॥7-20॥ |
| तां देवीं सन्निधाप्यैवं षडध्वक्रमतोऽपि वा।<br>पूजयेज्जलगन्धाद्यैः पुष्पैश्चैव समाहितः॥7-21॥ |
| अथर्गादिमयान् स्तम्भानाग्नेयादि प्रपूजयेत्।<br>वस्त्रैरावेष्ट्य जाताख्यविद्यात्माग्न्युत्तरेण च॥7-22॥ |
| पूर्वद्वारेण निर्गत्य सहायैर्मूर्तिपैरथ।<br>नीप्रान्ते कलयेत्सूत्रमीशानाद्यस्त्रमन्त्रतः॥7-23॥ |
| तथैव दर्भदामापि मूलाद्यग्रावसानकम्।<br>प्राग्द्वारि फलके शूलं "देवस्य त्वे"ति विन्यसेत्॥7-24॥ |
| ओतयेत्फलके तस्याः शोभनेऽश्वत्थपल्लवैः।<br>सदर्भैर्गूहयेद्दण्डा "वश्वत्थे व"इतीरयेत्॥7-25॥ |
| "उत्तिष्ठे"ति तदुत्थाप्य गर्तयोर्हस्तमात्रयोः।<br>संस्थाप्य तोरणान्येवं क्रमाद्द्वारान्तरेष्वपि॥7-26॥ |
| सुशोभनः सुभद्रश्च सुकर्मा च सुहोत्रकः।<br>देवतास्तोरणानां स्युर्ध्वजानां कुमुदादयः॥7-27॥ |
| कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः।<br>शङ्कुकर्णः सर्पनेत्रः सुमुखः सुप्रतिष्ठितः॥7-28॥ |

| |
|---|
| अष्टस्वपि ध्वजाग्रेषु स्थाप्याः पौरन्दरादितः।<br>पताका अपि सन्नह्येद्ध्वजाग्रेषु स्मरन्नजम्॥7-29॥ |
| तोरणध्वजदेवेभ्यो बलिं दद्याज्जलादिभिः।<br>ततः प्रागादितन्मन्त्रैस्तत्र तत्र हरिं स्मरन्॥7-30॥ |
| पूर्वद्वारान्तरागत्य पूरयेत्कलशानिह।<br>पार्श्वयोर्द्वारकलशावसव्ये तोरणात्मकम्॥7-31॥ |
| तत्तद्देवांश्च कलशेष्वर्चयेत्संस्मरन्हरिम्।<br>द्वारान्तरेष्वपि तथा पूरयेत्कलशान्क्रमात्॥7-32॥ |
| पूर्णः पुष्कर आनन्दनन्दनौ वीरसेनकः।<br>सुषेणस्सम्भवश्चाथ प्रभवो द्वारदेवताः॥7-33॥ |
| इन्द्रो यमश्च वरुणः सोमश्चापरदेवताः।<br>तारादयश्च सोद्देशा नमोऽन्ता मनवः स्मृताः॥7-34॥ |
| पञ्चगव्यमथ प्रोक्षेद्वायव्याऽग्निदिगादिकम्।<br>विकिरान्विकिरेच्च त्रिर्द्वादशाक्षरविद्यया॥7-35॥ |
| तयैव मार्जयेद्दिक्षु मुष्टिना चोत्तरे क्षिपेत्।<br>मुष्टिं विश्वथ्यापः स्पृष्ट्वा यजुर्वेदाभिमन्त्रितम्॥7-36॥ |
| दर्भाग्रमूलं विकिरेद्वारिणोक्षेच्च चन्दनम्।<br>ऐशान्यां पद्ममाधाय कुम्भेशं तत्र पूजयेत्॥7-37॥ |

| |
|---|
| वेष्टयेद्युग्मवस्त्रेण पूजयेदस्त्रदेवताम्। <br> प्रसादयेन्निवेद्याद्यैः कुम्भेशं कर्करीमपि॥ 7-38॥ |
| भित्तिप्रान्ते तु परितः स्त्रावयेत्करकोदकम्। <br> कुम्भेशं गुरुरेवानुयजेच्च शुभसिद्धये॥ 7-39॥ |
| विन्यस्य स्वस्तिके कीर्णान् सर्षपान् कर्करीं न्यसेत्। <br> विन्यस्य पद्मे विकिरान् कुम्भेशं पूर्ववन्न्यसेत्॥ 7-40॥ |
| पुनः करकमापूर्य पूजयेद्दक्षिणायतौ। <br> स्नात आचान्त आसीनः शुद्धदेहोऽथ मूर्तिपः॥ 7-41॥ |
| पुरस्ताद्देवमुख्यस्य कुर्यात्कुण्डस्य संस्कृतिम्। <br> तालत्रयादिकं गव्यप्रोक्षणान्तं यथोदितम्॥ 7-42॥ |
| कुर्यात्तत्र न दिक्पालक्लृप्तिं नो तोरणादिकम्। <br> सुपुष्पास्तृतकीर्णानां रक्षणं च मनीषितम्॥ 7-43॥ |
| कुण्डे त्वेकोनपञ्चाशत्पदानि समिधोल्लिखेत्। <br> अकाराद्यास्तु परितो हान्तास्तत्र यजेल्लिपीः॥ 7-44॥ |
| मध्ये ळक्षौ च तारं च तारांशान्मेखलासु च। <br> पुनर्योनौ स्वरानर्चेदन्त्ययोन्यग्रतोऽर्चयेत्॥ 7-45॥ |
| तत्तद्दैवानि चाभ्यर्च्य गायत्रीं वैष्णवीमपि। <br> रेखा उल्लिख्य षट् कूर्चं तत्रास्येद्योगविष्टरम्॥ 7-46॥ |

| |
|---|
| पूजयेत्पीठदैवानि ध्यायेत्तत्र परां श्रियम्।<br>रममाणं स्मरेद्देव्या परं नारायणं ततः॥7-47॥ |
| ज्ञानानन्दशरीरिण्या ज्ञानानन्दशरीरिणम्।<br>अङ्गारान्सुशुभान् शुद्धान् शरावे परिपूर्य च॥7-48॥ |
| "योनावस्या हरेर्वीर्य"मिति स्मृत्वा समर्चयेत्।<br>कुण्डे न्यस्ये "द्धरिर्गर्भमाधत्त" इति चिन्तयन्॥7-49॥ |
| "इन्धे राजे"ति मन्त्रेण निक्षिपेदिन्धनानि च।<br>औपतन्त्रिकमार्गेण कुर्यादग्निमुखं सुधीः॥7-50॥ |
| उल्लेख्याद्याज्यसंस्कारानन्तरं शुक्लकैर्हुतिः।<br>व्यस्तैः पूर्णां समस्तेनेत्यौपतन्त्रिकमुच्यते॥7-51॥ |
| न प्रणीता न च ब्रह्मा न बन्धो न चरुश्रपः।<br>नेध्मो न चक्षुस्स्विष्टाद्यमौपतन्त्रिकमुच्यते॥7-52॥ |
| गर्भाधानं करिष्यामीत्यनुस्मृत्य कृताञ्जलिः।<br>मूलेन पुष्पमाराध्य संस्मरेत्तत्र देवताः॥7-53॥ |
| वासुदेवादिकास्ताभ्यः शुक्लकैर्जुहुयाद्धृतम्।<br>पूर्णामन्त्यां समस्तेभ्यः पर्युक्षेच्च ततः परम्॥7-54॥ |
| नारायणोऽपि ता वासुदेवाद्याः कर्मदेवताः।<br>इति पञ्चविधं विष्णुं "स्वाम्यसी"ति क्षमापयेत्॥7-55॥ |

| |
|---|
| “गर्भाधानं कृतं स्वामिन्”इति बद्धाञ्जलिः स्मरेत्।<br>एवं पुंसवनं कार्यं सीमन्तोन्नयनं तथा॥7-56॥ |
| अथ विष्णुबलिं चैव जातकर्म ततः परम्।<br>उपनिष्क्रमणं नामकरणं च ततः परम्॥7-57॥ |
| अन्नप्राशनचौले च तथोपनयनं महत्।<br>महाव्रतानि चत्वारि विवाहो विहृतिर्वसोः॥7-58 ॥ |
| षोडशैताः क्रियाः कार्या अपि चोपनयान्तिकाः।<br>काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा।<br>स्फुलिङ्गिनी विश्वरुचीति वह्वेर्जिह्वाभ्य आभ्यो जुहुयाद्धृतानि॥7-59॥ |
| नारायणं सन्निदधानमग्नौ तं पञ्चरूपान्नमयादिरूपम्।<br>सञ्चिन्तयन्नष्टशतानुवृत्त्या घृतानि जुह्वीत परामृतानि॥7-60॥ |
| पूर्णामृतानन्दकरानुसन्ध्या पूर्णां च सव्योत्तरया विदध्यात्।<br>आनन्दगायत्रिकया द्विरुक्त्या तारान्तरं नेत्रकृतावसित्या॥7-61॥ |
| अभ्युक्ष्य सम्पातकृतावशेषं वेद्यां हरेः सन्निधिसाधनाय।<br>विधापयेन्मण्डलमादिपुंसः सुदर्शनाम्भोजमतीव चित्रम्॥7-62॥ |

**इति योगदीपिकायां सप्तमः पटलः ॥7-62॥**

## अष्टमः पटलः ॥8-81॥

विधास्यन्नथ चक्राब्जमलङ्कुर्वीत मण्डलम्।
वितानैः फलपुष्पादिमालामुक्तावलम्बनैः ॥8-1॥

साष्टाङ्गुलं चतुर्हस्तं तुर्यस्रं मण्डपे क्रियात्।
कोणसूत्रे च कृत्वाऽस्य कर्णसूत्राणि पातयेत्॥8-2॥

बाहुसूत्राणि चत्वारि विभजेच्च त्रिधा त्रिधा।
सूत्राणि पातयेत्तेषु प्राक् प्रत्यक् दक्षिणोत्तरम्॥8-3॥

पुनश्च कर्णसूत्राणि तेषु सूत्रान्तराणि च।
पङ्क्तीस्ता द्विगुणीकुर्यात्ताः पुनस्त्रिगुणीक्रियात्॥8-4॥

चतुर्विंशच्चतुर्विंशत्पदपङ्क्तीरिमा विदुः।
वीथ्यर्थं वर्तयेद्वृत्तं मुक्त्वा पङ्क्तिद्वयं बहिः॥8-5॥

पङ्क्तिद्वयं पुनर्मुक्त्वा कुर्यादास्यं तु वर्तुलम्।
वीथी सार्धैकपङ्क्तिः स्यात्तदन्तर्भ्रामयेत्समम्॥8-6 ॥

चतुर्धा राश्यरान्नाभिपद्मान्येषु प्रकल्पयेत्।
राश्यन्तर्वर्तुलादन्तर्वलयेत्पञ्चमांशतः॥8-7॥

द्विरन्तर्भ्रामयेन्नाभौ यथावृत्तत्रयं भवेत्।
राश्यन्तर्वर्तुला पद्ममध्यमानेन लाञ्छयेत्।
पार्श्वयोर्वर्तुले तस्मिन्दिग्विदिग्गतसूत्रतः॥8-8॥

| |
|---|
| तेषु षोडशमस्येषु कुर्यात्सूत्राष्टकं मिथः ॥8-9॥ |
| सूत्राण्येवं चतुर्विंशपरितश्चक्रवर्तुले।<br>भवेयुस्तैररं कुर्यादन्योन्याबद्धसूत्रकैः ॥8-10॥ |
| मध्यसूत्रे यथाग्रं स्यान्मूलं तत्पार्श्वसूत्रयोः।<br>अराग्रसूत्राद्द्राश्यन्तर्वृत्ते सन्धाय वर्तयेत्॥8-11॥ |
| चक्रवृत्तशतात्पार्श्वसूत्राद्यन्तं यथा भवेत्।<br>अन्तर्वृत्ताद्बहिः कुर्याद्राश्यग्राणि दलाग्रवत्॥8-12॥ |
| द्वाराणि तद्बहिर्दिक्षु तेषामुभयपार्श्वतः।<br>शोभोपशोभायुग्मानि कोणन्येषां च पार्श्वतः॥8-13॥ |
| पद्मं द्वादशपत्रं स्याद्वासुदेवाभिराधने।<br>नारायणस्य पूजायां भवेदष्टदलोचितम्॥8-14॥ |
| सितेन रजसा तत्र सूत्रवृत्तानि बृंहयेत्।<br>कर्णिकां पूरयेत्पीतैर्दलानि सितचूर्णकैः॥8-15॥ |
| केसराग्राणि रक्तेन पीतेन च तदन्तरम्।<br>दलाग्राणि च रक्तेन श्यामेन च तदन्तरम्॥8-16॥ |
| वृत्तत्रयं क्रमाच्छ्वेतरक्तनीलैः प्रपूरयेत्।<br>अरान्नेमींश्च रक्तेन पीतेन च तदन्तरम्॥8-17॥ |

| |
|---|
| वीथीं श्यामेन सम्पूर्य लतां तत्र समालिखेत्।<br>तत्कोणानि च रक्तेन द्वाराणि सितचूर्णकैः॥8-18॥ |
| शोभोपशोभके रक्तपीताभ्यां परिपूरयेत्।<br>कृष्णचूर्णेन तत्कोणान्येवं चक्रसरोरुहम्॥8-19॥ |
| मण्डले तण्डुलप्रस्थान्नव द्वादश वा शुभान्।<br>पूरयित्वा प्रसार्यात्र कुशान्कूर्चांश्च विन्यसेत्॥8-20॥ |
| गैरिकं तत्र विन्यस्य कौशेयाद्यं प्रासारयेत्।<br>स्वाध्यायं परितः कुर्युर्मण्डलं रक्षितुं द्विजाः॥8-21॥ |
| प्रागेव सव्यतो विष्णोः शुचौ देशेऽब्जमालिखेत्।<br>कलशं पूजयेत्तत्र पूर्ववत्सुसमाहितः॥8-22॥ |
| अर्धरात्रात्यये स्नात आचान्तः शुद्धदेहवान्।<br>देवं तमभिषिच्येशदिशि स्नातः प्रसादयेत्॥8-23॥ |
| द्वादशावरसुलक्षणशालिग्रामसङ्गतचतुर्भुजमूर्तिम्।<br>द्वारकानुगतमेत्य रमेशं प्रार्चयेत्सुकृतमेतदमुष्मिन्॥8-24॥ |
| तत्र स्वस्तिकविन्यस्तवरासनगतं हरिम्।<br>अभिमृश्यजपेत्सूक्तं पौरुषं मूलमेव च॥8-25॥ |
| त विकासयितुं पुष्पैश्चन्दनाद्यैरथार्चयेत्।<br>आराधयन्मूलमन्त्रैर्विज्ञानानन्दविग्रहम्॥8-26॥ |

| |
|---|
| व्यापकाद्यं यथापूर्वं कृत्वा सङ्क्षेपतोऽर्चयेत्।<br>जलगन्धैः पुष्पधूपदीपनैवेद्यतर्पणैः॥8-27॥ |
| निर्माल्यं परिहृत्याथ सम्यक्तमभिषेचयेत्।<br>मूलमन्त्रैस्तथा पुंसः श्रुत्या नारायणस्य च॥8-28॥ |
| अङ्गानि न्यस्य गत्वाऽञ्चेत्कलशं गन्धपुष्पकैः।<br>प्रस्थानार्घ्यं प्रदायाङ्गं न्यस्यैनं प्रोद्धरेच्छनैः॥8-29॥ |
| नयेत्प्रदक्षिणावर्तमातपत्रोपरिच्छदम्।<br>नानावाद्यकृताघोषं कलशं तमुपानयेत्॥8-30॥ |
| मौलावक्षतमाधाय धूपेत्पल्लवविप्लुषः।<br>कूर्चं मूर्ध्नि हरेर्न्यस्य कलशस्नापनं क्रियात्॥8-31॥ |
| मूलमन्त्रान्जपन्धीमाननुलोमं तथा लिपीः।<br>पुंसूक्तं च स्मरेदेतद्रूपं तत्रैकतां गतम्॥8-32॥ |
| अङ्गन्यासं ततः कृत्वा प्रोक्षेत्पादोदकैः स्वकम्।<br>अङ्गवस्त्रेण संमृज्य मण्डले तं प्रसादयेत्॥8-33॥ |
| तुषारोदकसंमृष्टचन्दनेनोपगूहयेत्।<br>चन्दनोपरि कर्पूरपरागानपि धूलयेत्॥8-34॥ |
| पात्राणि पञ्च धूपाद्यैः संस्कृतानि हरेः पुरः।<br>सादितानि सुमुत्तान्य तेषु द्रव्याणि निक्षिपेत्॥8-35॥ |

| |
|---|
| अथापः पूरयेत्तुर्ये निक्षिपेद्दधिमाक्षिके।<br>सिद्धार्थमक्षतं चैव कुशाग्रं तिलमेव च॥ 8-36॥ |
| यवं गन्धं फलं पुष्पमर्घ्यद्रव्याणि चक्षते।<br>पाद्यं श्यामाकदूर्वाब्जविष्णुक्रान्तिभिरिष्यते॥ 8-37॥ |
| लवङ्गजाति तक्कोलद्रव्यैराचमनीयकम्।<br>शुद्धाम्बुतुलसीमिश्रं पुनराचमनीयकम्॥ 8-38॥ |
| षडाचमनपात्राणि त्रीणि त्रीण्यर्घ्यपाद्ययोः।<br>एकं तु मधुपर्कस्येत्येवं केचित्प्रचक्षते॥ 8-39॥ |
| नवकृत्वो जपेन्मूलं गृहीत्वा तानि मन्त्रवित्।<br>अथाऽऽचार्यः समाचान्त आसीनः स कुशासने॥ 8-40॥ |
| विन्यस्य मूलमन्त्राङ्गान्यारभेतार्चनं हरेः।<br>ततः स्नात्वा समाचम्य होतृकाः शुद्धविग्रहाः॥ 8-41॥ |
| स्वस्वकुण्डानि संस्कुर्युः पुरस्तादुक्तवर्त्मना।<br>परिकर्मी शरावेण वह्निमाचार्यकुण्डतः॥ 8-42॥ |
| होतृकेभ्यो नयेदन्तः स्वयं गच्छन्बहिः शुचिः।<br>प्राक्कुण्डे विहरेत्पूर्वं ततः पूर्ववदानयेत्॥ 8-43॥ |
| विहृताग्नेर्बहिर्नीत्वा दक्षिणां विहरेच्च ताम्।<br>एवं प्रत्यगुदक्कुर्यात्तथाऽऽग्नेयादिषु क्रमात्॥ 8-44॥ |

समिध्योद्दीप्यते कुर्युरूपस्थानादिकं क्रमात्।

ऐतरेयेण मार्गेण तैत्तिरीयेण चोक्तवत्॥8-45॥

न चरुश्रपणं कुर्युरिहाग्नौ केऽपि होतृकाः।

बहिःश्रितेन हविषा पक्कहोमादि तन्मते॥8-46॥

आचार्यो जलगन्धाद्यैः पूजयेत्पीठदेवताः।

हरिं विकासयन्कुर्यान्मूलेन कुसुमाञ्जलिम्॥8-47॥

कुर्याद्व्यापकतालाद्यं यथापूर्वमुदाहृतम्।

अजानन्दादि विन्यस्येदनुलोमं कलाशतम्॥8-48॥

पुष्पमाराध्य मूलेन कुर्यादर्घ्यं सुसाधितम्।

अन्ते "ऽर्घ्यमिद"मित्युक्त्वा पुष्पमाराधयेत्पुनः॥8-49॥

न्यायेनानेन पाद्याद्यं तत्तत्पात्रे प्रसेचयेत्।

मुखासेचनमर्घ्यं स्यात्पाद्यं पादावसेचनम्॥8-50॥

उक्तं तृतीयमाचान्तं तुर्यं धातुप्रसादनम्।

पञ्चमं पुनराचान्तं विष्णोर्लोकविडम्बिनः॥8-51॥

ईशानासनगस्नानस्मृत्याऽऽराध्य प्रसूनकम्।

मूलेन सलिलं दत्त्वा वदेत् "स्नानमिदं"त्विति॥8-52॥

पुनराराध्य कौशेयं निदध्यात्परितो हरेः।

ततो "वस्त्रमिदं" ब्रूयात्तत्र तत्र कृताञ्जलिः॥8-53॥

आराध्य हारमालाद्यैर्भूषयेद्भूषणोत्तमैः।

तं “भूषणमिदं” चोक्त्वा पुनः पुष्पैः समर्चयेत्॥8-54॥

रौक्मं यज्ञोपवीतं च दद्यादर्घ्यं रमेशितुः।

“यज्ञोपवीतमिद”मित्युक्त्वाऽऽचमनमर्पयेत्॥8-55॥

आराध्याभ्यर्थितं योगविष्टरं समधिष्ठितम्।

हरिं स्मृत्वा “ऽऽसनमिद”मित्युक्त्वैनं प्रसादयेत्॥8-56॥

तत्तत्कर्मविशेषेषु मूलं सर्वत्र संहितम्।

हरिस्मृतिश्च सर्वत्र संहितेति न संशयः॥8-57॥

पुष्पं हिमाम्बुकर्पूरघृष्टगन्धद्रवद्रुतम्।

अञ्जलौ पूर्णमादाय सम्यङ्नारायणं स्मरेत्॥8-58॥

यथोक्तं परमं ध्यायन् भक्त्या गद्गदया गिरा।

उपांशु मन्त्रमुच्चार्य कुर्यात्पुष्पाञ्जलिं हरौ॥8-59॥

कुर्यात्पुष्पाञ्जलीनेवमष्टोत्तरशतावरान्।

अपि वा द्वादशाक्षर्या वासुदेवं विचिन्तयन्॥8-60॥

शुद्धस्फटिकसङ्काशं सारिशङ्खवराभयम्।

अभितः श्रीभुवावर्चेदङ्गाद्यावरणानि च॥8-61॥

लोकेशान्सप्रियान्सास्त्रान्सावाहान्सपरिग्रहान्।

गुग्गुल्वगरुकर्पूरचन्दनोशीरसर्पिषा॥8-62॥

| |
|---|
| धूपयेन्नीचकैः स्वैरं घण्टामुद्घोषयन्धनाम्।<br>कर्पूरमिश्रया वर्त्या सर्पिषोच्चैः प्रदीपयेत्॥8-63॥ |
| पुनः पुष्पैस्त्रिरभ्यञ्चेत्पुष्पैः स्वान्योजयेद्धरौ।<br>अङ्गानि तत्तदङ्गेषु दीपाद्दीपान्तरानिव॥8-64॥ |
| पुरः स्थण्डिलमालिप्य प्रापणं तत्र वासयेत्।<br>सम्पूर्णं संविभागं च गुडाज्यैः प्लावयेच्च तत्॥8-65॥ |
| मोदकैः कादलैः साकं योग्यैश्च मधुरान्तरैः।<br>विभज्य वैश्वदेवार्थमतःपूर्वोक्तवर्त्मना॥8-66॥ |
| समर्पयेद्रमेशाय प्रभूतं पायसादिकम्।<br>होतृका मुख्यदिश्येष्वावाहयेयुस्ततोऽग्निषु॥8-67॥ |
| क्रमान्नारायणं वासुदेवं सङ्कर्षणं तथा।<br>प्रद्युम्नमनिरुद्धं च वह्निकोणादिवह्निषु॥8-68॥ |
| ब्रह्मविष्णुवराहांश्च नारसिंहं ततः क्रमात्।<br>वासुदेवादिकाङ्क्षिचित्प्रागाग्नेयादिषु क्रमात्॥69॥ |
| आहुस्तथैव तत्पक्षे भवेद्विहरणं वसोः ।<br>वासुदेवसपर्यायामाद्ययोः स्याद्विपर्ययः॥8-70॥ |
| अन्ययोश्च विपर्यासमल्पीयांसं प्रचक्षते।<br>स्वागताद्यं च ते कुर्युर्लिपिन्यासादि चोदितम्॥8-71॥ |

| |
|---|
| अथाभ्यर्च्यैध्महोमाद्यं कुर्युश्चकुर्भवान्तिकम्।<br>पक्कहोमं ततः कुर्युरवदानोक्तवर्त्मना॥ 8-72॥ |
| तारसंहितया विष्णोर्गायत्र्या तु द्विरुक्तया।<br>स्वाहाकारान्तया तत्तद्गायत्र्या चोक्तलक्षणान्॥ 8-73॥ |
| समिदाज्यचरूनाज्यं क्रमेण जुहुयुस्ततः।<br>अष्टोत्तरशतावृत्त्या सौकर्ये च ततोऽधिकम्॥ 8-74॥ |
| आज्येनाभ्यज्य मूलाग्रे समिधा होम इष्यते।<br>पूर्णं कुर्युः प्रतिद्रव्यमाधिक्ये तु शते शते॥ 8-75॥ |
| पुरस्तादुक्तरूपिण्या गायत्र्या वौषडन्तया।<br>पलाशाश्वत्थजापाग्र्या औदुम्बरसमुद्भवाः॥ 8-76॥ |
| खदिरप्लक्षबिल्वोत्थाः काश्मर्यः समिधो मताः।<br>पलाशकदिराश्वत्थप्लक्षन्यग्रोधबिल्वजाः॥ 8-77॥ |
| औदुम्बराश्च काश्मर्य इति पक्षान्तरक्रमः।<br>पलाशा एव मुख्याग्नेः सर्वत्रापि त एव वा॥ 8-78॥ |
| समिदाज्यचरून्लाजान्सर्षपांश्च यवांस्तिलान्।<br>व्रीहीनाज्यं पुनश्चेति नव केचन जुह्वते॥ 8-79॥ |
| जुहुवुः परिवारेभ्यो घृतं चरुमथापि वा।<br>पक्कहोमेष्वतीतेषु तत्र तत्र हरिं स्मरन्॥ 8-80॥ |

वैश्वदेवं तत्र कुर्यादपि चोदितवर्त्मना।
स्विष्टाद्यं होतृकाः कृत्वोद्वासयेयुर्महेश्वरम्॥8-81॥

इति योगदीपिकायां अष्टमः पटलः ॥8-81॥

## नवमः पटलः ॥9-45॥

ततो गत्वा गुरुः कुर्यान्निवेद्योद्वासनादिकम्।
मुखवासादिकांश्चाघ्र्यन्यायेनैवोपचारकान्॥9-1॥

तुषारवारिकर्पूरगण्डूषो मुखवासकः।
सिताः कोलकलाश्चूर्णं तुषारोदकसंस्कृतम्॥9-2॥

सुशुभं घनसारं च ताम्बूलमिति कीर्तितम्।
तृतीयमञ्जनं प्रोक्तं कर्पूराद्यैः सुसंस्कृतम्॥9-3॥

चतुर्थं सुखदं तेजोमणिरूपं च दर्पणम्।
मणिदण्डं सितं श्लक्ष्णं चामरं पञ्चमं विदुः॥9-4॥

षष्ठं पादुकमब्जादिचिह्नितं रत्नहाटकम्।
सप्तमं पट्टकौशेयपरीतं छत्रमिष्यते॥9-5॥

एषु येषाम सौलभ्यं तेषां प्रतिनिधिर्भवेत्।
तस्याप्यलाभे सलिलं क्वचित्पुष्पं क्वचिद्भवेत्॥9-6॥

परितो मण्डलस्याथ स्वस्तिकानि विधापयेत्।
पात्रसङ्ख्यानुसारेण तेषु व्रीह्यादिकं न्यसेत्॥9-7॥

| |
|---|
| मूर्तिपोऽङ्कुरमभ्यर्चेदर्घ्याद्यैः सनिवेद्यकैः।<br>दत्त्वा बलिं निशावर्तान्यादाय स्वस्तिकं न्यसेत्॥9-8॥ |
| मेषादीशानपर्यन्तं तत्तद्रूपं हरिं स्मरन्।<br>मालतीकुन्दमन्दारयूथिकाजातिचम्पकैः॥9-9॥ |
| नन्द्यावर्तोत्पलाम्भोजैः केतकीगिरिकर्णिकैः।<br>एतैः कृष्णार्चनादामैः सुलभैरपि राधयेत्॥9-10॥ |
| मण्डले च किरेदेतैस्तुलसीभिर्विशेषतः।<br>दीपावलिं ततः कुर्युः परितो भक्तिसम्भृताः॥9-11॥ |
| जपेयुर्वैदिका उच्चैः स्वाध्यायं लघु सुष्ठु च।<br>सङ्कीर्तनैः सुगान्धर्वं कीर्तयेयुस्तथाऽपरे॥9-12॥ |
| तत्तत्तालानुसारेण नृत्येयुर्बटवोऽपरे।<br>अन्ये जय जयेत्युच्चैर्घोषयेयुर्दिशो दश॥9-13॥ |
| यजमानः समाचान्तः समेत्यासव्यतो गुरोः।<br>कृताञ्जलिपुटः स्थित्वा जपेन्मन्त्रं शतावरम्॥9-14॥ |
| ततः पुष्पाञ्जलिं कृत्वा सम्यगाचार्यपादयोः।<br>नमेन्नारायणं देवं गुरुं च प्रणमेत्पुनः॥9-15॥ |
| गुरुः सम्प्रीतिपूजाद्यं कुर्यादुक्तं सविस्तरं।<br>गुरुः सम्प्रीतिपूजार्थं कुर्यात् त्रीन् कुसुमाञ्जलीन्॥9-16॥ |

| |
|---|
| पंच वा सप्त वा तत्र धूपदीपान् प्रकल्पयेत्।<br>पुनः पुष्पं पुनश्चार्घ्यं पुनश्च कुसुमाञ्जलिम्॥9-17॥ |
| ततः प्रणामानष्टाङ्गान् कुर्यादष्टादशावरान्।<br>अभिष्टय हरिं स्तोत्रै "र्जितं त"इतिपूर्वकैः॥9-18॥ |
| नीराजयेच्च देवेशं दीपमण्डलपङ्क्तिभिः।<br>वादयेयुस्ततो वाद्यान्यनवद्यानि वादकाः॥9-19॥ |
| पुनः पुष्पाञ्जलिं कृत्वा दद्यादर्घ्यं समाहितः।<br>सुगन्धपङ्क्तिलैः शङ्खजलैः पाद्यं च सेचयेत्॥9-20॥ |
| तच्छेषसलिलैः प्रोक्षेदात्मानं याजकं ततः।<br>जनान्भागवतान्सर्वानपः सम्यगुपस्पृशेत्॥9-21॥ |
| पादमूलमुपस्पृश्य पुंसूक्तं प्रजपेद्धरेः।<br>अष्टोत्तरशतं मूलमथाङ्गानि च विन्यसेत्॥9-22॥ |
| न्यसेच्च चक्रमुद्राद्यं मूलेन परमात्मनः।<br>ततः क्षमापयेद्देवं भूयो भूयः प्रसादयेत्॥9-23॥ |
| स्वस्वाङ्गानि च विन्यस्य प्राणायामत्रयं क्रियात्।<br>हृदि सञ्चिन्त्य कर्तारं हरिं तत्र समर्चयेत्॥9-24॥ |
| यजमानो दक्षिणाभिस्तोषयेद्गुरुमञ्जसा।<br>स्वयं चेद्यजमानोऽपि स्वगुरुं तोषयेद्धनैः॥9-25॥ |

| |
|---|
| दक्षिणां होतृकादिभ्यो यावत्सामर्त्यमर्पयेत्।<br>तोषयेद्ब्राह्मणान् भोज्यैःर्विष्णवे सुसमर्पितैः ॥9-26॥ |
| प्रापणं गुरवे दत्त्वा तच्छेषेण समन्वितम्।<br>संविभागं समश्नीयाद्द्वादश्यामनपक्रमैः ॥9-27॥ |
| नित्यमभ्यर्चयेद्देवं न तत्राङ्कुरमण्डपौ।<br>असौकर्यान्न कलशो न होमो नापि मण्डलम्॥9-28॥ |
| अर्घ्यादिकं जलैर्दद्यान्नैवेद्यं कुसुमैरपि।<br>तत्तद्द्रव्यविभूषादेरसौलभ्यान्न सङ्ग्रहः ॥9-29॥ |
| पुष्पाञ्जलय उद्दिष्टा अष्टाविंशदथापि वा।<br>त्रिशः सम्प्रीतिपूजायामादावन्ते ततस्त्रयः ॥9-30॥ |
| अतोऽपि यदि सङ्क्षेपः पीठार्चादिचतुष्टयम्।<br>आदावन्ते द्वयं कुर्यान्मूलार्चाष्टादशावरम्॥9-31॥ |
| वासुदेवाद्यावरणमनन्तादि ततः परम्।<br>पूज्यमिन्द्रादिकं नान्यत्सङ्क्षिप्तत्वान्मनीषितम्॥9-32॥ |
| एवं स्याद्वैश्वदेवं तु सम्प्रीत्यर्चां सकृत्सकृत्।<br>अचलप्रतिमा चेत्स्यान्न्यायेनानेन पूजयेत्॥9-33॥ |
| कलशान्पूरयेत्पूर्वं विस्तारे नव पञ्च वा।<br>प्रथमं पूरयेन्मुख्यं कर्णिकायां ततोऽपरान्॥9-34॥ |

| |
|---|
| प्रागादिदिक्षु पात्रेषु ततोऽग्न्यादिविदिक्षु च।<br>अथ चोक्तक्रमेणैव पद्मस्वस्तिकमण्डले॥ 9-35 ॥ |
| मुख्ये मूलं तु विश्वाद्यानात्माद्यान् परितो यजेत्।<br>वासुदेवादिकान् केचिद्ब्रह्मादींश्च प्रचक्षते॥ 9-36 ॥ |
| ब्रह्मेति ब्रह्मणा पूज्यो विष्णुरेव न पद्मभूः।<br>कृत्वा चतुर्दलं पद्मं पञ्च चेत्तत्र पूरयेत्॥ 9-37 ॥ |
| मध्ये नारायणं वासुदेवादीन् परितोऽर्चयेत्।<br>एकं चेदुक्तमार्गेण सम्यगाराधयेच्च तान्॥ 9-38 ॥ |
| अथापवरकद्वारि द्वस्स्थावञ्चेज्जलादिभिः।<br>प्रविश्यान्तर्हरेर्भक्त्या तारेण चरणौ स्पृशेत्॥ 9-39 ॥ |
| स्पृष्ट्वा तत्पीठमासीनः शोषणादिकमाचरेत्।<br>अमृताप्लाविते स्थाने संस्मरन्पीठदेवताः ॥ 9-40 ॥ |
| पूजयेज्जलगन्धाद्यैस्तत्तदन्तर्हरिं स्मरन्।<br>अथोत्थाय स्थितं विष्णुं पीठे तस्मिन् सुखात्मकम्॥ 9-41 ॥ |
| विकासयंस्तु मूलेन कुर्यात्पुष्पाञ्जलिं हृदि।<br>व्यापकाद्यं यथापूर्वं कृत्वाऽर्घ्यादींश्च कल्पयेत्॥ 9-42 ॥ |
| ईशानदिग्गतं स्नातं स्मरन् पुष्पेण राधयेत्।<br>यथोक्तं स्नपनं कृत्वा न्यासान्सर्वान्समाचरेत्॥ 9-43 ॥ |

विधीयते वैश्वदेवमिहापवरकाद्बहिः।
असव्यकोणे शेषेण तन्मन्त्रैर्बलिमावहेत्॥9-44॥

अथ प्रदक्षिणीकृत्य नमस्कृत्यार्पयेत्सुधीः।
द्वारस्थानुज्ञया घण्टामुद्घोष्यान्तः शनैरियात्॥9-45॥

तन्निवेद्यमथोद्वास्य प्रोक्तामर्चां समापयेत्।

## इति योगदीपिकायां नवमः पटलः

## दशमः पटलः ॥10-88॥

देवं सुषुम्नामार्गेण आनीय ब्रह्मरन्ध्रकम्।
वामनासापुटाद्ध्यात्वा निर्गतं स्वाञ्जलिस्थितम्॥10-1॥

सम्पूज्य प्रतिमादौ च पुष्पमारोप्य मन्त्रतः।
अष्टाक्षरेण मन्त्रेण कुर्यादावाहनं विभोः॥10-2॥

हृत्स्थं देवं समावाह्य बहिर्बिम्बे नियोजयेत्।
प्रतिमांशास्समस्ताश्च प्रत्येकममितांशकाः॥10-3॥

एकैकांशं पुनर्ध्यायेन्मध्यादिप्रतिमांशकान्।
यथा चित्रे हि दृश्यन्ते अचिन्त्येश्वरशक्तितः॥10-4॥

हस्तपादोदराद्यङ्गाः नवनार्यो गजात्मना।
एकस्याः  प्रतिमायाश्च हस्ताद्येवंपरास्तथा॥10-5॥

| |
|---|
| अन्यस्याः प्रतिमायास्तु ह्यन्यावयवरूपताम्।<br>चिन्तयेद्भक्तिमान्विष्णोः पूजाकाले रमापतेः ॥ 10-6 ॥ |
| अर्चारूपे विशेषेण ह्यणोरणुतरान्बहून्।<br>समग्रप्रतिमायास्तु अंशांशान्कोशरूपकान्॥ 10-7 ॥ |
| निस्सङ्ख्याकांस्तथा ध्यायेत्तत्तद्विग्रहरूपकान्।<br>कालो व्याप्तस्तथा ह्यंशाः कालिका व्याप्य संस्थिताः ॥ 10-8 ॥ |
| आकाशश्च तथा व्याप्तः वेदास्सर्वेऽप्यनन्तकाः।<br>तद्वर्णा अप्यनन्ताश्च प्रत्येकं व्याप्य संस्थिताः ॥ 10-9 ॥ |
| प्रकृतिश्च तथा व्याप्ता वर्णाः पञ्चाशदेव वा।<br>व्याप्ताः सर्वेऽपि वर्तन्ते तादृशास्तत्र सर्वदा ॥ 10-10 ॥ |
| प्रतिमारूपकेष्वद्धा ह्यंशेष्वपि पृथक्पृथक्।<br>एवं ध्यात्वा च देवेशं मुख्यप्राणं जगद्गुरुम्॥ 10-11 ॥ |
| ध्यायेत्तदन्तः सर्वत्र महालक्ष्मीं विशेषतः।<br>अंशांशेषु स्वरूपेण स्थितां ध्यायेत्समस्तशः ॥ 10-12 ॥ |
| एवं ध्यात्वा ह्यर्चकस्तु ह्यर्चारूपं ततः परम्।<br>सान्निध्यं प्रार्थयेत्तत्र ह्यर्चारूपे विशेषतः ॥ 10-13 ॥ |
| मत्स्यकूर्मादिकान्सर्वान्केशवादींस्तथैव च।<br>क्रुद्धोल्कादींस्तथा पञ्च विमलादींस्तथा नव ॥ 10-14 ॥ |

| |
|---|
| वासुदेवादिकान्पञ्च व्यूहतः संस्थितास्ततः। <br> सविश्वतैजसप्राज्ञतुरीयात्मान्तरात्मकान्॥ 10-15॥ |
| परमात्मज्ञानात्मयुजान्सर्वत्र व्यूह्य संस्थितान्। <br> पञ्चाशद्वर्णवाच्यानप्यजानन्दादिरूपकान्॥ 10-16॥ |
| शतं नारायणादींस्तु विश्वादींस्तु सहस्रशः। <br> स्थितांस्तथा बहूंश्चापि परेत्याद्यभिधांस्तथा॥ 10-17॥ |
| अजिताद्यनन्तरूपांश्च हिङ्काराद्यभिधायुतान्। <br> लोमादिनिष्ठान्सर्वांश्च पञ्चशो व्यूह्य संस्थितान्॥ 10-18॥ |
| अजाद्यादिषु सर्वत्र प्रत्येकं पञ्चधा स्थितान्। <br> द्वासप्ततिसहस्रेषु नाडीषु स्त्रीपुमात्मना॥ 10-19॥ |
| स्थितान् सहस्रबृहीतनाम्नस्तद्गान्विशेषतः। <br> पुरुषायुरहोरात्रसंस्थितान् स्त्रीपुमात्मकान्॥ 10-20॥ |
| द्वासप्ततिसहस्रांश्च प्रत्येकं व्यूह्य संस्थितान्। <br> अनन्तवेदगान्सर्वपुराणादिषु च स्थितान्॥ 10-21॥ |
| श्रीब्रह्मसूत्रगाध्यायवाच्यानंशान्पृथक्पृथक्। <br> वासुदेवादिकांस्तत्तत्पदवाच्यांस्तथैव च॥ 10-22॥ |
| तद्भेदान्वासुदेवादीन्सम्यक्षोडशधा स्थितान्। <br> प्रतिसूत्रं प्रतिपदं प्रत्यक्षरगतांस्तथा॥ 10-23॥ |

| |
|---|
| सदोदितान्प्रतिपदैरक्षरैश्च विशेषतः।<br>व्याप्तानां सर्ववस्तूनां प्रत्येकममितेष्वपि॥ 10-24 ॥ |
| अंशांशेषु च सर्वत्र तत्सन्ध्यादिषु संस्थितान्।<br>देहस्थास्थिगरूपाणां षष्ठ्युत्तरशतत्रयम्॥ 10-25 ॥ |
| तथा मज्जास्वरूपाणि तथा सर्वगतानि च।<br>अशीत्युत्तरसाहस्ररूपाण्येवं परेशितुः॥ 10-26 ॥ |
| हरेरंशानचिन्त्यांश्च रमाया अपि सर्वशः।<br>तेषां ज्ञानबलौदार्यभक्तेयानन्दादिषु स्थितान्॥ 10-27 ॥ |
| गतान्ससप्तावरणब्रह्माण्डवयवेष्वपि।<br>लोकेष्वपि च सर्वेषु ससागरमहीतले॥ 10-28 ॥ |
| समुद्रसप्तके सप्तद्वीपेषु च पृथक् पृथक्।<br>नवखण्डेषु मेर्वादिपर्वतादिषु च स्थितान्॥ 10-29 ॥ |
| तदण्डेष्वपि सर्वेषु सर्वतो व्याप्य संस्थितान्।<br>विष्णोरंशांस्तथाज्ञानबलानन्दादिकानपि॥ 10-30 ॥ |
| ज्ञात्वा तान्नामकृष्णादिरूपस्यांशान्परान्पृथक्।<br>रामरामो रामकृष्णः कृष्णराम इति क्रमात्॥ 10-31 ॥ |
| शक्तीः सर्वा हरेरंशा एकस्य च हरेस्तथा।<br>रूपाणि चिन्तयेत्पश्चाज्ज्ञानानन्दबलादिकान्॥ 10-32 ॥ |

| |
|---|
| रामकृष्णादिरूपेण संस्थितांश्च पृथक् पृथक्।<br>ज्ञानरामो ज्ञानकृष्णः ज्ञानव्यास इति क्रमात्॥ 10-33॥ |
| संस्थितान्गुणगुण्यादिक्रियावयवरूपकान्।<br>ध्यात्वा विष्णोः परानंशान् श्वेतद्वीपादिषु स्थितान्॥ 10-34॥ |
| मुक्तामुक्तेषु जीवेषु तत्वेषु च विशेषतः।<br>तन्नियामकदेवेषु तद्गुणादिषु च स्थितान्॥ 10-35॥ |
| श्रीरङ्गादिषु सर्वत्र सालिग्रामादिकेष्वपि।<br>श्रीमदानन्दतीर्थार्यकरकञ्जार्चितासु च॥ 10-36॥ |
| कृष्णरामव्यासपूर्वप्रतिमास्वपि सर्वशः।<br>ज्ञात्वैषां परमैक्यं च पूर्णस्वातन्त्र्ययोगतः॥ 10-37॥ |
| निस्सीमशक्तिमत्त्वाच्च तत्तत्स्थानस्थितानपि।<br>अविहाय स्थितिं तत्र स्वार्चाबिम्बगतान्सदा॥ 10-38॥ |
| पूर्णत्वाद्देशकालादिव्यवधानोज्झितान्सदा।<br>सम्पूज्य मानसे पूर्वं स्वरतं तं रमापतिम्॥ 10-39॥ |
| गन्धपुष्पादिभिस्सम्यगर्चाबिम्बे विशेषतः।<br>पूर्वोक्तेषु च सर्वेषु प्रतिमावयवेषु च॥ 10-40॥ |
| तद्गतेषु च सर्वेषु प्रतिमारूपकेष्वपि।<br>चिन्तायित्वा सन्निधानं प्रार्थयेत्परमात्मनः॥ 10-41॥ |

| |
|---|
| पूजोपयुक्तद्रव्येषु गन्धपुष्पादिकेषु च।<br>तथोपहाररूपेषु भक्ष्यभोज्यादिकेष्वपि॥ 10-42॥ |
| चामरव्यजने छत्रगीतवाद्यादिकेष्वपि।<br>स्थितः स्वरूपभोक्ताऽसौ पूज्यबिम्बस्थितो हरिः॥ 10-43॥ |
| कृत्वाऽर्चादिसपर्यांश्च पुजां कुर्याद्विधानतः।<br>हरिर्बिम्बस्थितः स्वात्मभोक्ता भोग्यस्थितो विभुः॥ 10-44॥ |
| पूजोपहाररूपेषु गन्धपुष्पादिवस्तुषु।<br>स्थितो विष्णुः पूज्यबिम्बगतं स्वात्मानमेव हि॥ 10-45॥ |
| गन्धपुष्पादिरूपेण स्वीकुर्यात्परमेश्वरः।<br>पूजकान्तर्गतो विष्णुः पूज्यबिम्बगतो हरिः॥ 10-46॥ |
| पूज्यपूजकरूपेण भोक्तृभोज्यात्मना तथा।<br>रमते हरिरेवैकः क्रीडया परमेश्वरः॥ 10-47॥ |
| एवं सञ्चिन्त्य मनसा सर्वत्र जगदीश्वरम्।<br>पूजयेज्जगतामीशं यथाविभवमर्चकः॥ 10-48॥ |
| दयाळुत्वं परेशस्य वर्णयेत्कः पुमान्भुवि।<br>द्रव्यसम्पादनायासः पूजार्थं नैव विद्यते॥ 10-49॥ |
| निष्किञ्चनैरपि हरिः पूज्यते हि धनं विना।<br>स्वरूपलाभपूर्णस्य भक्तिरेव प्रयोजिका॥ 10-50॥ |

| |
|---|
| वासनारूपके बिम्बे भक्तिचिन्ताप्रकल्पिते।<br>अनेकरत्नखचितदिव्यभूषणसंयुते॥ 10-51॥ |
| स्थितो विष्णुर्भक्तपूजां स्वीकरोति रमापतिः।<br>वासनारूपकान्भोज्यान्भुङ्क्ते तत्प्रविचिन्तितान्॥ 10-52॥ |
| गन्धमाल्याम्बरादींश्च भक्ष्यभोज्यादिकानपि।<br>भुङ्क्ते विष्णुः पूर्णशक्तिः बाह्यभोगविलक्षणान्॥ 10-53॥ |
| पानीयादीन्बहुविधान्स्वर्णपात्रेषु संस्थितान्।<br>वासनारूपकेष्वद्धा पदार्थेषु पृथक्पृथक्॥ 10-54॥ |
| तत्तदाकारसंयुक्तान्स्वरूपान्स्वीकरोत्यजः।<br>इति विज्ञानमात्रेण पूजितो भवति स्फुटम्॥ 10-55॥ |
| तत्तदाकारसंयुक्ता देवाः सर्वेऽपि सर्वदा।<br>स्थिता भोज्यपदार्थेषु ह्यर्पयेयुः स्वरूपकान्॥ 10-56॥ |
| महालक्ष्मीस्वरूपाणि भोज्यवस्तुस्थितानि च।<br>तत्तदाकारयुक्तानि रसगन्धात्मकानि च॥ 10-57॥ |
| पूर्णभोग्यस्वरूपात्मा पुनर्भोगान्करोत्यजः।<br>ब्रह्मादिसर्वजीवानं स्वरूपं स्वीकरोत्यसौ॥ 10-58॥ |
| स्वरूपानन्दभोक्ता च तेषां विष्णुस्सनातनः।<br>अजादिसर्वमुक्तानां विचित्रानन्दसन्तितम्॥ 10-59॥ |

| |
|---|
| मुक्तभोग्यानचिन्त्यांश्च भुङ्क्ते देवोऽमितद्युतिः।<br>सुस्वादु महदाश्चर्यं लोकतोऽतिविलक्षणम्॥ 10-60॥ |
| महालक्ष्मीस्वरूपं च भोग्यजातं महाद्भुतम्।<br>स्वस्वरूपात्मकं दिव्यं मनोवाचामगोचरम्॥ 10-61॥ |
| अनन्तेन्द्रियसम्भोग्यं भुङ्क्ते ह्यानन्दसागरः।<br>इति विज्ञानमात्रेण प्रीतो भवति नित्यशः॥ 10-62॥ |
| पूजकान्तर्गतो विष्णुः स्वरूपं स्वयमेव हि।<br>लीलयाऽर्चयति श्रीशः तदधिष्ठानमात्रतः॥ 10-63॥ |
| भक्तानां फलदो विष्णुर्भवत्येव न संशयः।<br>चेतनान्तर्गतो विष्णुरिच्छाज्ञानप्रयत्नकान्॥ 10-64॥ |
| उत्पाद्य चेतनेष्वीशः दत्त्वा स्वाधीनकर्तृताम्।<br>स्वभक्तं फलभाजं हि करोति जगदीश्वरः॥ 10-65॥ |
| वनस्थान्फलमूलादीन् विना द्रव्यं सुखागतान्।<br>ईषत्प्रयत्नतस्साध्यान्यो नित्यं ह्यर्पयेद्बुधः॥ 10-66॥ |
| तस्य प्रीतो जगन्नाथो भवत्येव न संशयः।<br>भक्तानुकम्पी विष्णुर्हि किमु वक्तव्यमेव हि॥ 10-67॥ |
| पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।<br>तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ 10-68॥ |

| |
|---|
| इति विष्णोर्हि वचनं कृपा विष्णोः परात्मनः।<br>भक्तेषु वर्तते नित्यमिति ज्ञेयं बुभूषुभिः॥10-69॥ |
| शरीरयात्रासिद्ध्यर्थमन्नपानधनादिकान्।<br>सम्पादयति यानेव पूजार्थं तान्प्रकल्पयेत्॥10-70॥ |
| फलपुष्पादिकेष्वीशः जडेष्वपि हरिः परः।<br>स्वमात्रभोग्यसारांश्च महालक्ष्म्यास्तथैव च॥10-71॥ |
| ब्रह्मेशशक्रकामादिदेवानां च पृथक् पृथक्।<br>एवं मानुषपर्यन्तं स्थितानामधिकारिणाम्॥10-72॥ |
| योग्यान्सारांस्तथा श्रीशः पूर्णानन्दः परात्परः।<br>भुङ्क्ते देवः परानन्दो ह्यचिन्त्यैश्वर्ययोगतः॥10-73॥ |
| मानुषेन्द्रियभोग्यांस्तु स्वदृष्ट्या स्वीकरोत्यजः।<br>इति ज्ञात्वा रमेशस्य ह्यर्पणादेव सर्वदा॥10-74॥ |
| प्रीतो भवेत्परानन्दविग्रहः परमेश्वरः।<br>महाकारुणिको विष्णुः यस्माद्भूतभविष्यगान्॥10-75॥ |
| कर्मसङ्घान्देवसङ्घान्दारापत्यधनादिकान्।<br>सकृत्समर्पणादेव ह्यनन्तफलदो भवेत्॥10-76॥ |
| विधिवाक्यानुसारेण कृतं विष्णौ समर्पयेत्।<br>तथा निषेधतस्त्यक्तान् सर्वांस्तस्मै समर्पयेत्॥10-77॥ |

| |
|---|
| तस्मादीश्वरपूजार्थं न द्रव्यार्जनवान्भवेत्।<br>तस्मान्महाकारुणिको हरिरेव न चापरः॥10-78॥ |
| त्रिषु धामसु यद्भोज्यं भोक्ता यस्तु प्रकीर्तितः।<br>वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते ॥10-79॥ |
| अन्यादृशी भवेद्भक्तिरचिन्त्या दैवतैरपि।<br>इत्यादि च यथाशक्तिं संस्मरेद्धरिभोजने॥10-80॥ |
| मानुषा वर्णभेदेन तथैवाऽश्रमभेदतः।<br>क्षितिपा मनुष्यगन्धर्वाः देवाश्च पितरश्चिराः॥10-81॥ |
| आजानजाः कर्मजाश्च जयाद्याः सनकादयः।<br>पुष्करः शिष्टदेवाश्च शनिश्चोषा बुधस्तथा॥10-82॥ |
| स्वाहा तथैव पर्जन्यो मनवो वायुजस्तथा।<br>विघ्नेश्वरश्च मित्रश्च वसिष्ठोऽग्निश्च नारदः॥10-83॥ |
| वरुणो विधुश्च प्रवहः अनिरुद्धश्च तैजसः।<br>इन्द्रोमे मित्रविन्दा च रुद्रो वाणी च मारुतः॥10-84॥ |
| उत्तरोत्तरतस्त्वेते भगवद्भक्तिगोचराः।<br>तेषु भक्तिः क्रमेणैव कार्या नित्यं मुमुक्षुभिः॥10-85॥ |
| सर्वेऽपि गुरवश्चैते पुरुषस्य सदैव हि।<br>तस्मात्पूज्याश्च नम्याश्च ध्येयाश्च परितो हरिम्॥10-86॥ |

उमादिमारुतान्तेषु समः समगुणोऽपि सन्।

ध्यातः प्रीतिं हरिर्यायादधिका उत्तरोत्तरे॥10-87॥

नामादिमारुतान्तेषु देवेष्वेभ्यश्च भेदतः।

उपासितो हरिर्मुक्तिं दद्यान्नास्त्यत्र संशयः॥10-88॥

इति योगदीपिकायां दशमः पटलः ॥10-88॥

इति कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिता

योगदीपिका सम्पूर्णा

॥ श्रीलक्ष्मीवेंकटेशः प्रसीदतु॥

॥ श्रीकृष्णार्पणमस्तु॥